
The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY :-
SHREE . P. H - KARANI
Date 17-10-2008

1214

279
1984

रघुवंशमूल

Rughoo Woungsh

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

281
1984

अथ रघुवंशप्रारंभः ग्रंथसंख्या २३००

॥श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः वागर्थाविवसंपृक्तौवागर्थप्रतिपत्तये जातःपितरौवंदेपार्व
तीपरमेश्वरौ १ क्वसूर्य्यप्रभवोवंशःक्वचाल्पविषयामतिः तितीर्षुर्दुस्तरंमोहाद्दुडुपेनास्मिसागरं २ मंदःकवियशःप्रा
र्थीगमिष्याम्युपहास्यतां प्रांशुलभ्येफलेमोहादुद्बाहुरिववामनः ३ अथवाकृतवाग्द्वारेवंशेऽस्मिन्पूर्वसूरिभिः म
णौवज्रसमुत्कीर्णेसूत्रस्येवास्तिमेगतिः ४ सोहमाजन्मःशुधानामाफलोदयकर्म्मणां असमुद्रक्षितीशानामानाकर
थवर्त्मनां ५ यथाविधिहुताःग्नीनांयथाकामार्चितार्थिनां यथापराधदंडानांयथाकालप्रबोधिनां ६ त्यागायसंभृत
र्थानांसत्यायमितभाषिणां यशसेविजिगीषूणांप्रजायैगृहमेधिनां ७ शैशवेभ्यस्तविद्यानांयौवनेविषयैषिणां वार्द्धक
मुनिवृत्तीनांयोगेनांतेतनुत्यजां ८ रघुणामन्वयंवक्ष्येतनुवाग्विभवोऽपिसन् तद्गुणैःकर्णमागत्यचापलायप्रणोदि
तः ९ सेतंतःश्रोतुमर्हंतिसदसव्यक्तिहेतवः हेम्नःसंलक्ष्यतेह्यग्नौविशुद्धिश्यामिकापिवा १० वैवस्वतोमनुर्नाम
माननीयोमनिषिणां आसीन्महीक्षितामाद्यःप्रणवश्छंदसामिव ११ तदन्वयेशक्षितिमतिप्रभूतःशुद्धिमन्वरः दिली
पइतिराजेंद्रदुडुपेरिनिधाविव १२ व्यूढोरस्कःवृषस्कंधःशालप्रांशुर्महाभुजः आत्मकर्म्मक्षमंदेहंक्षात्रोधर्मइवाश्रि
तः १३ सर्वातिरिक्तसारेणसर्वतेजोभिभाविना स्थितःसर्वोन्नतेनोर्वीकांतामेरुरिवात्मना १४ आकारसदृ
शप्रज्ञःप्रज्ञयासदृशागमः आगमैःसदृशारंभःप्रारंभःसदृशोदयः १५ भीमकांतैर्नृपगुणैःसबभूवोपजीव्यो
विनां असदृश्यश्चाभिगम्यश्चयादोरत्नैरिवार्णवः १६ रेखामात्रमपिक्षुण्णादामनोर्वर्त्मनापरं नव्यतीयुःप्रजास्तस्यनि
यंतुर्नेमिवृत्तयः १७ प्रजानामेवभूत्यर्थंसताभ्योबलिमग्रहीत् सहस्रगुणमुत्स्रष्टुमादत्तेहिरसंरविः १८ सेनापरि
च्छदस्तस्यद्वयमेवार्थसाधनं शास्त्रेष्वव्याहृताबुद्धिर्मौर्व्वीधनुषिचाततां १९ तस्यसंरतमंत्रस्यगूढाकारेंगितस्य
च फलानुमेयाःप्रारंभाःसंस्काराःप्राक्तनाइव २० जुगोपात्मानमत्रस्तोभेजेधर्ममनातुरः अगृध्नुराददेसोर्थान्नसन्न
सुखमन्वभूत् २१ ज्ञानेमौनंक्षमामक्षमाशक्तौत्यागेश्लाघाविपर्ययः गुणागुणानुबंधित्वात्तस्यसप्रसवादिव २२ अ
नाकृष्टस्यविषयैर्विद्यानांपारदर्शिनः तस्यधर्मरतेरार्यातृष्टहृत्वज्जरसाविना २३ प्रजानांविनयाधानाद्रक्षणाद्भ

283
1484

रणादपि सपितापितरस्तासांकेवलंजन्महेतवः २४ स्थित्यैदंड्यतोदंड्यान्परिणेतुःप्रसूयते अप्यर्थकामौतस्या
स्तांधर्म्मायैवमनीषिणः २५ दुदोहगांसयज्ञायसस्यायमघवादिवे संपद्विनिमयेनोभौदधतुर्भुवनद्वये २६ न
क्लिनत्ययुक्तस्यराजानोरक्षितुर्यशः व्याहृतायत्परास्वेभ्यःभूतेनास्करतास्थिता २७ हुंड्योऽपिसम्मतःशिष्टःतस्य
स्त्ययथौषध त्याज्योदुष्टःप्रियोप्यासीदरिष्टोगुरुरिवाहिना २८ तंवेधसविदधेनंमहाभुतसमाधिना तथाहिसर्वे
तस्यासन्परार्थैकफलागुणाः २९ सचेलावप्रवलयांपरिखीकृतसागरां अनन्यशासनामुर्वीशशासैकपुरीमिव ३०
तस्यदाक्षिण्यरूढेननाम्नामगधवंशजा पत्नीसुदक्षणेत्यासीदध्वरस्येवदक्षिणा ३१ कलत्रवंतमात्मानमवरोधम
हत्यपि तयामनेमनस्विन्यालक्ष्मावचसुधाधिपः ३२ तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः विलोचितफलैः
कालंसनिनायमनोरथैः ३३ संतानार्थायविधयेस्वभुजादवतारिता तेनभूजंगलोगुर्वीसचिवेषुनिधिक्षिपे ३४ गंगा
भगीरथेनेवपूर्वेषांपावनक्षमा इक्ष्वाकवेसंततितेनन्यस्तामंत्रिषुकोसलाः ३५ अथार्त्विधातारंप्रयतोपुत्रकाम्यया
तोदंपतिवसिष्ठस्यगुरोर्जगमतुराश्रमं ३५ स्निग्धागंभीरनिर्घोषमकस्यंदनमास्थितौ प्रावृषेण्यंपयोवाहविद्युदेव
तावित्र ३६ प्राप्तूदाश्रमपीडतिपरिमेयपुरःसरौ अनुभावविशेषात्तुसेनापरिवृतावित्र ३७ सेव्यमानौमुखस्पर्शैःशी
तलैर्नियमगंधिभिः पुष्परेणूत्करैर्वातैरधूतवनराजिभिः ३८ पवनस्यानुकूलत्वात्प्रार्थनासिद्धिरासिन रजोभिर
स्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ३९ हयंगवीनमादायघोषवृत्त्यानुपास्थितान् नामधेयानिपृच्छंतौवन्यानांमार्गशा
खिनां ४० सरसीष्वरविंदानांवीचिविक्षोभशीतलं आमोदमुपजिघ्रंतौस्वनिश्वासानुकारिणं ४१ मनीषिभिरामाःशृण्व
तोरथनेमिस्वनोन्मुखैः षडसंवादिनीःकेकाद्विधाभिन्नाःशिखंडिभिः ४२ परस्परालिसादृश्यंमदूराज्जितवर्त्मसु मृग
द्वंद्वेषुपश्यंतौस्यंदनाबद्धदृष्टिषु ४३ श्रेणीबंधादिवोत्पत्य तिरस्तोरणस्रजं सारसैःकलनिर्ह्रादैःक्वचिदुन्नमितानना
४४ श्रमघ्नात्मविसृष्टेषुयूपचिन्हेषुयज्वनां अमोघाःप्रतिगृह्णंतावर्घ्यानुपदमाशिषः ४५ दवाग्निःकुलकं का
प्यभीक्ष्णातयोरासीद्गजतोःश्रुत्यवेषयोः हिमनिर्मुक्तयोर्योगेचित्राचंद्रमसोरिव ४६ तन्नंदूमिपतिःपत्न्यैदर्शयनप्रियद

र्शनः अपिलंघितमद्वानंबुबुधेनबुधोपमः ४७ सदुःप्रापयशाःप्रापदाश्रमंश्रांतवाहनः सायंसंयमिनस्तस्यमहर्षे
र्महिषीसखः ४८ वनांतरादुपावृत्तैस्समित्कुशफलाहरैः अग्निप्रत्युद्गमान्पूतैःपूर्यमाणंतपस्विभिः ४९ सकांतमुनि
कन्याभिस्तत्क्षणोज्झितवृक्षकं विश्वासायविहंगानामालवालांबुपायिनं ५० आतपात्ययसंक्षिप्तनीवारासुनिपादिभिः
मृगैर्वर्त्तितरोमंथमुरुजोगणभूमिषु ५१ आकर्णमृषिपत्नीनामुटजद्वाररोधिभिः अपत्यैरिवनीवारभागधेयोचितैर्मृ
गैः ५२ अभ्युत्थितामिपिशुनैरतिथिनाश्रमोन्मुखान् पुनानंपवनोद्धूतैधूमिराहुतिगंधिभिः ५३ कुलकं अथयंता
रमादित्यंधुर्यान्विश्रमयेतिसः तामवारापयत्पत्नीरथादवततारच ५४ तस्मैसख्याःसभार्यायगोप्तेगुप्तमनिंद्रियाः
अर्हणामर्हतेचक्रुर्मुनयोनयचक्षुषे ५५ विधेःसायंतनस्यांतेसदर्शनपोनिधिं अन्वासितमरुंधत्यास्वाहएवहविर्भुजं
५६ तयोर्जगृहतुःपादान्राजाराज्ञीचमागधीः तोगुरुर्गुरुपत्नीचप्रीत्याप्रतिननंदतु ५७ तन्मानिष्यंक्रियायोग
नरथस्योपरिश्रमं प्रपेदेकुशलंराज्येराज्याश्रममुनिर्मुनिः ५८ अथाथर्वनिधेस्तस्यविजितारिपुरःपुरः अर्थ्यो
मर्थपतिर्वाचमाददेवदतांवरः ५९ उपपन्नंतनुनिशिवंसत्त्वंगेषुयस्यमे देवीनामानुषीणांचप्रतिहर्त्रीतिमापदां ६०
तवमंत्रकृतोमंत्रैर्दूरात्संशमितारिभिः प्रत्यादिपत्स्यंतइवमदशूलक्षताःशराः ६१ हविरावर्जितंदानस्तवयाविधि
वदग्निषु दृष्टिर्भवतिसस्यानामवग्रहविशोषिणां ६२ पुरुषायुषजीविन्योनिरातंकानिरीतयः यन्मदीयाःप्रजास्तु.
त्रेहनुस्त्वन्नाथाःविच्छिंसं ६३ त्वयैवंचित्पमानस्यगुरुणात्मयोनिना सानुबंधःकथंनस्युःसंपदोमेनिरापदः ६४ वि
नुबध्नांतवेतस्यामदृष्टसदृशप्रजां नमामवतिमहीपालसूरिंपेमदिनीं ६५ मानुरदुर्लभंमत्वानूनमावर्जितंम
या पयःपूर्वंसनिश्वासंकवोष्णमुपभुंजते ६६ नूनंमत्रःपरवंद्याःपिंडविस्तददर्शितः नप्रकामभुजोश्रात्यात्व
धासंग्रहनस्मरा ६७ सोहमिज्याविशुद्धात्माप्रजालोपनिमीलितः प्रकाशाश्चाधकारश्चलोकालोकइवाचलः ६८
लोकांतरसुखंपुण्यंतपोदानसमुद्भवं संततिःशुद्धवंशाहिपरत्रेहचशर्मणे ६९ तथाहीनविधानमोकथंपश्यन्दृश्य
से सिक्तंस्वयमिवस्नेहाद्ध्यमाश्रमपादपं ७० असत्यपिदंभगवन्नृणेप्रसमेवहिमे अरुंतुदमिवालानमनिर्वा

285/1984

णस्यदंतिनः ७१ तस्मान्मुच्ययथातातसंविधातुंनचार्हसि इक्ष्वाकूणांदुरापेर्थेत्वदधीनाहिधिश्चयः ७२ इतिवि
ज्ञापितोराज्ञाध्यानस्तिमितलोचनः क्षणमात्रमृषिस्तस्थौसुप्तमीनोयथाह्रदः ७३ सोपश्यत्प्राणिधानेनसंततेःस्खं
भकारणं भाविनात्माभुवोभर्त्तुरथैनंप्रत्यबोधयत् ७४ पुराशक्रमुपस्थायतपोवीर्यप्रतियास्यतः आसीत्कल्पतरुच्छा
यामाश्रिताःसुरभिःपथिः ७५ इमांदेवीमृतुस्नातांस्मृत्वासपदिसत्वरः प्रदक्षिणक्रियातीतःस्तस्याःकोपमजीजन
त् ७६ धर्मलोपभयाद्राज्ञीमिमांसंत्यसत्वरः प्रदक्षिणक्रियाहीयांतस्यांत्वंसाधुनाचरः ७७ अवज्ञानासिमांयस्मा
दतस्तेनभविष्यति मत्प्रसूतिमनाराध्यप्रजेतित्वांशशापसा ७८ सशापोनत्वयाराजन्नचसारथिनाश्रुतः नदत्पा
कात्रगंगायाःश्रोतस्युद्दामदिग्गजे ७९ ईप्सितंतेनदत्तानात्विद्विसार्गलमात्मनः प्रतिबध्नातिहिश्रेयःपूज्यपूजा
व्यतिक्रमः ८० क्षेपक० हविषेदोधर्मसत्रस्यसाचेदानींप्रचेतसः भुजंगपिहितंद्वारंपातालमधितिष्ठति ८० क्षे
पक० सगोमदीयांसुरभेःकृत्वाप्रतिनिधिंशुचिः आराधयासपत्नीकःसाधोकामंविधास्यति ८१ इतिवादिनए
वास्यहोतुराहुतिसाधने अनिंद्यानंदिनीनामःधेनुरावर्तनंवनात् ८२ क्षेपक० ताम्रललाटजांरेखां बिभ्रतीसामि
तेतरां संध्याप्रतिपदेनवप्रतिभिन्नाहिमांशुना ८३ भुवंकोष्णेनकुंडोन्मीमध्येनाभ्रुवादपि प्रभवेनाभिवर्षंती
वत्सालोकप्रवर्त्तिना ८४ रजःकणैःखुरोद्धूतैःस्पृशद्भिर्गात्रमंबिकात् तीर्थाभिषेकजांशुद्धिमाद्दधानामहीभृतः
८५ पंचभिःकुलकं तांपुण्यदर्शनांदृष्टनिमित्तज्ञस्तपोनिधिः याज्यमाशंसितावंध्यप्रार्थिनंपुनरन्नवात् ८६
अदूरवर्त्तिनींसिद्धिराजन्विगणयात्मनः उपास्तितेपंकल्याणीनाम्निकीर्त्तिंतरुंवयत् ८७ वन्यरत्तिरिमाशास्व
दात्मानुगमनेनगां विद्यामभ्यसनेनेवप्रसादयितुमर्हसि ८८ प्रस्थितायांप्रतिष्ठेथाःस्थितायांस्थानमाचरे नि
षण्णायांनिषीदास्यांपीतांभसिपिबेरपः ८९ वधूर्भक्तिमतीत्वेनामर्च्चितामातपावनात् प्रयतांप्रातरेतेन्वनुसायंप्रत्यु
द्गजेदपि ९० इत्याप्रसादादस्माकंपरिचर्यापराभवः अविघ्नमस्तुतेभूयाःपितेवधुरिपुत्रिणां ९१ तथेतिप्रति
जग्राहप्रीतिमानृषिपरिग्रहः आदेशंदेशकालज्ञःशिष्यःशासितुरानतः ९२ अथप्रदोषदोषज्ञःसंध्यारागायविज्ञा

पतिं सूनुः सूनृतवाक्कृष्णविसमज्ञोऽक्षितश्रियं १३ सत्यामपितपःसिद्धौनियमोपेक्षयामुनिः कल्पविकल्पया
मासकन्यामवास्पृसंविधौ १४ निर्दिष्टांकुलपतिनांसमेतः शालामध्यास्प्रयतःपरिग्रहद्वितीयः नक्तिष्याध्यय
ननिवेदितावासनासंविष्टः कुशशयननिशानिनायः १५ इतिश्रीरघुवंशमहाकाव्येकविश्रीकालिदासकृतौदिली
पवसिष्टाश्रमवर्णनोनामप्रथमःसर्गः १ अथप्रजानामधिपःप्रभातेजायाप्रतिग्राहितगंधमाल्यां वना
यपीतप्रतिबद्धवत्सांयशोधनोधेनुमृषेर्म्मुमोच १ तस्याःखुरन्यासपवित्रपांसुमपांसुलानांधुरिकीर्त्तनीया मा
र्गमनुष्यश्वरधर्मपत्नी श्रुतेरिवार्थस्मृतिरन्वगच्छत् २ निवर्त्यराजादयितांदयालुस्तांसारभेयीसुरभियशोभिः प
योधरीभूतचतुःसमुद्रांजुगोपगोरूपधरामवोर्वीं ३ व्रतायतेनानुचरेणधर्मोन्यषेधिशेषाप्यनुयायिवर्गः नचा
न्यतस्तस्यशरीररक्षास्ववीर्यगुप्तांहिमनोःप्रसूतिः ४ आस्वादवद्भिःकवलैस्तृणानांकंडूयनैर्दंशनिवारणैश्च अया
हतेःस्वैरगतेःसतस्याःसम्राट्समाराधनतत्परोभूत् ५ स्थितःस्थितामुच्चलितःप्रयातांनिषेदुषीमासनबंधधी
रः जलाभिलाषीजलमाददानांच्छायेवतांभूपरिरन्वगच्छत् ६ सन्यस्तचिन्हामपिराजलक्ष्मीतेजोविशेषानुमि
तांदधानः आसीदनाविष्कृतदानराजिरंतर्मदावस्थइवद्विपेंद्रः ७ लताप्रतानोद्गथितैःसकेशैरधिज्यधन्वा
विचचारदावं रक्षोपदेशान्मनिहोमधेनोर्वन्यान्विनेष्यन्विवृतेषुसत्वान् ८ विसृष्टपार्श्वानुचरस्यतस्यपार्श्वद्रुमापा
शाभृतासमस्य उदारयामासुरिवोन्मदानामालोकशब्दंवयसांविरावैः ९ मरुत्प्रयुक्तश्रमरुक्षखांतमर्च्यमा
रादभिवर्त्तमानं श्रवाकिरन्बालललताप्रसूनैराचारलाजैरिवपौरकन्याः १० धनुर्भृतोप्यस्यदयार्द्रभावमास्थात
मंतःकरणैर्विशंकैः विलोकयंत्योर्वपुरापुरध्वांप्रकामविस्तारफलैर्हरिण्यः ११ सर्कीचकर्मारुतपूर्णरंध्रैःकज
न्दिरापादितवंशकृत्यं शुश्रावकुंजेषुयशःस्वमुच्चैरुद्गीयमानंवनदेवताभिः १२ वृक्षस्तुषारोर्गिरिनिर्झराणा
मनोकहाकंपितपुष्पगंधिः तमातपत्रमाचारपूतंपवनःसिषेव १३ शाखामदृष्ट्वापिविनादवा
ग्विरासिहिंसाफलपुष्पवृद्धिः ऊर्ध्वंनसत्वेषधिकोबबाधतस्मिन्वनेगोसरिगाहमाने १४ संस्कारपूतानि दि
गंतराणिकृत्वादिनांतनिलयायगंतुं प्रचक्रमेपल्लवरागताम्राप्रभापतंगस्यमुनेश्चधेनुः १५ तांदेवतापित्रतिथिक्रिया

र्थामन्वाययोमध्यमलोकपालः वभौचसातेनसतांमतेनश्रत्येवसाक्षाद्विधिनोपपन्ना १६ सपल्वलोत्तीर्णवराहयूथान्या
वासवृक्षोन्मुखबर्हिणानि ययौमृगाध्यासितशाद्वलानिशमायमानानिवनानिपश्यन् १७ आपीनभारोद्वहनप्रयत्ना
द्दृष्टिर्गुरुत्वादुपुषानरेंद्रः उभावलेचक्रतुरंचितायांतपोवनाभ्यन्तरसन्निपत्यंगताभ्यां १८ वसिष्ठधेनोरनुयायिनंतमावर्तमा
नंवनितावनांतात् पयोनिमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिवलोचनाभ्यां १९ पुरस्कृतावर्त्मनिपार्थिवेनप्रत्युद्गता
पार्थिवधर्मपत्न्या तदंतरेसाविरराजधेनुर्दिनक्षपामध्यगतेवसंध्या २० प्रदक्षिणीकृत्यपयास्विनींतांसुदक्षिणा
साक्षतपात्रहस्ता प्रणम्यचानर्च्चविशालमस्याःशृंगांतरंद्वारमिवार्थसिद्धेः २१ वत्सोत्सुकापिस्तिमितास्पयोभृ
त्प्रत्यग्रहीत्सातिननंदतुःतौ भक्त्योपपन्नेषुहितार्थिनांप्रसादचिन्हानिपुरःफलानि २२ गुरोःसदारस्यनिपीड्यपा
दौसमाप्यसांध्यंचविधिंदिलीपः दोहावसानेपुनरेवदोग्ध्रीभेजेभुजाच्छिन्नरिपुर्निषण्णं २३ तामंतिकन्यग्रोधवतीं
प्रदीपामन्वास्यगोसंगृहिणीसहायः क्रमेणसुप्तामनुसंविवेशसुप्तांस्थितांप्रातरनूदतिष्ठत् २४ इत्यव्रतंपालयतः
प्रजार्थंसमंमहिष्यामहनीयकीर्त्तेः समव्यतीयायनिगुणानिवस्यदिनानिदीनोहरणोचितस्य २५ अन्यद्युरात्मानु
चरस्यभावंजिज्ञासमानामुनिहोमधेनुः गंगाप्रतापोतनिरुद्धशिष्यंगौरीगुरुर्गह्वरमाविवेश २६ सादुःप्रधर्षांमनसा
पिहिंस्रैरित्यद्रिशोभाप्रहितसणेन श्रलक्षिताभ्युत्पतनोनृपेणप्रसह्यसिंहःकिलतांचकर्ष २७ तदीयमाक्रंदितमा
र्त्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं रश्मिमिवादायनगेंद्रसक्तांनिवर्त्तयामासनृपस्यदृष्टिः २८ सपाटलायांगवित
स्तिवांसंधनुर्धरःकेसरिणांददर्श श्रधित्यकायामिवधातुमप्योरोघद्रुमंसानुमतःप्रफुल्लं २९ ततोमृगेंद्रस्यमृगे
द्रगामीवधायवध्यस्यशरंशरण्यः जातामिषंगोनृपतिर्निषंगादुद्धर्तुमैच्छत्समरोद्धतारिः ३० बाहुप्रतिष्टंभविवृद्धमन्यु
रभ्युर्णमागस्कृतमस्मृताद्रिः राजास्त्रतेजोभिरदह्यतांतर्भोगीवमंत्रौषधिरुद्धवीर्यः ३१ तमार्यगृह्यनिगृही
तधेनुर्मनुष्यवाचामनुवंशकेतुं विस्मापयन्विस्मितमात्मशस्त्रोभूपालसिंहंनिजगादसिंहः ३२ श्रलंमहीपालतवश्रमे

गप्रयुक्तमप्यस्त्रमितोऽथास्यात् नपादयोन्मूलनशक्तिरंहः शिलोच्चयेमूर्छतिमारुतस्य ३४ कैलासगौरंवृषमा
रुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं श्रृंगंहिमार्किकरमष्टमूर्त्तेः कुभादरेनामनिकुंभतुल्यः ३५ श्रमुपुरःपश्यसिदेवदा
रुपुत्रीकृतोसारुषभध्वजेन योंहमकुंभस्तननिःसृतानांस्कंदस्यमातुःपयसांरसज्ञः ३६ कंडूयमाननकटंकदाचिद्व
न्यद्विपेनोन्मथितात्वगस्य श्रथनमंद्रस्तनयाभुशोचसेनान्यमार्लोटमिवासुरस्त्रैः ३७ तदाप्रभृत्येववनाद्विपानांत्वा
सार्थमास्मिन्नद्रमद्रिकुक्षौ व्यापारितःशूलभृतोविधायसिंहत्वमकागतमत्सदृक्षैः ३८ तस्यालमेषासुधितस्यतृप्त्यै म
दिष्टकालापरमध्वरेण उपस्थितोशोणितपारणोमेसुरद्विषश्चाद्रमसृक्कलेव ३९ सत्त्वंनिवर्त्तस्वविहायलज्जांयुरोभवा
नूदहितशिष्यभक्तिः शस्त्रेणरक्ष्यंयदशक्यरक्ष्येनतद्यशःशस्त्रभृतांक्षिणोति ४० इतिप्रगल्भंपुरुषाधिराजोमृगा
धिराजस्यवचोनिशम्य प्रत्युत्पन्नतारस्त्रोगिरिशप्रभावादात्मान्यवज्ञांशिथिलंचकार ४१ प्रत्यब्रवीच्चैनमिषुप्रयोगेन
मूर्वसंगेवितथप्रयत्नः जडीकृतास्त्र्यंबकवीक्षितेनवज्रंमुमुक्षन्निववज्रपाणिः ४२ सरुच्चचक्षस्थमृगेंद्रकायमहास्य
वच्चस्तद्यदहंविवस्वः श्रंतर्गतंप्राणभृतांहिवेदसर्वंभवान्भावमतोभिधास्ये ४३ मान्यःसमस्तावरजंगमानांसर्गस्थि
तिप्रत्यवहारहेतुः गुरोरपीदंधनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं ४४ सत्त्वंमदीयंनशरीरवृत्तिदहनिर्वर्त्तयितुंप्र
सीद दिनावसानोत्सुकबालवत्सांविमुच्यतोधेनुमियंमहर्षेः ४५ श्रथाधकारंगिरिगह्वराणांदंष्टामयूखैःशकलानिकु
र्वन् भूयःसभूतेश्चरपार्श्ववर्त्तीकिंचिद्विहस्यार्थपतिंबभाषे ४६ एकात्मपत्रंजगतःप्रभुत्वंनवंवयःकोनमिदंवपु
श्च श्रलाभस्यहतोर्बहुहातुमिच्छन्विचारमूढःप्रतिभासिमेत्वं ४७ भूतानुकंपातवचेदियंगौरकामधेनुस्त्वदनं
तरंतत्दत्ते जीवन्पुनःशश्वदुपप्लवेभ्यः प्रजाःप्रजानाथपितवपासि ४८ श्रथैकधेनोरपराधचंडाद्गुरोःकृशानुप्र
तिमाद्विजस्यि शक्योस्यमन्युर्भवतानिवर्तयुंगाः कोटिशःस्पर्शयताघटार्घाः ४९ तद्रक्षकल्माषपरंपराणांमाक्रामू
र्जस्वलमात्मदेहं महीतलस्पर्शनमात्रभिन्नमृर्धद्विराज्यंपदमेद्रमाहुः ५० एतावदुक्त्वाविरतंमृगेंद्रप्रतिस्वनेनास्य
गुहागतेन शिलोच्चयोपिक्षितिपालमुच्चैः प्रीत्यातमवार्थमभाषतेव ५१ निशाम्यदेवानुचरस्यवाचंमनुष्यदेवःपुन
रप्युवाच धेन्वातदध्यासनकातरास्यानिरीक्ष्यमाणःसुतरांदयालुः ५२ क्षतात्किलत्रायतइत्युदग्रःक्षत्रस्यशब्दो

2.89
1984

भुवनेषुरूढः राज्येनकिंतद्विपरीतवृत्तेःप्राणैरुपक्रोशमलीमसैर्वा ५३ कथंनुशक्योमुनयोमहर्षेर्विश्राणनादन्य
पयस्विनीनां इमामनूनांसुरभेरवेहिरुद्रौजसानुप्रहृतंत्वयास्यां ५४ सेयंस्वदेहार्पणनिष्क्रयेणन्याय्यामयामोच
यितुंभवन्तः नपाराणास्याद्विहृतातवैवंभवेदलुप्तश्चमुनेःक्रियार्थः ५५ भवानपीदंपरवान्नवेतिमहान्हियत्स्तब्धरे
वदारो स्थातुंनियोक्तुंर्यदशक्यमग्रेविनाश्यरक्ष्यंस्वयमक्षतेन ५६ किमप्यहिंस्यस्तवचेन्मतोहंयशःशरीरेभवमर
यालुः एकांतविध्वंसिषुमद्विधानांपिंडेष्वनास्थारवलुभौतिकेषु ५७ संबंधमाभाषणपूर्वमाहुर्वृत्तःसनासंगतयो
र्वनांते तन्मूतनाथानुगनार्हमित्रसंबंधिनोःयेत्रणंयविहंतुं ५८ तथेतिगामुक्तवतेदिलीपःसद्यःप्रतिष्ठंभविमुक्त
बाहुः सन्यस्तशस्त्रोहरयेस्वदेहमुपानयत्सिंहमिवामिषस्य ५९ तस्मिन्क्षणेपालयितुःप्रजानामुत्पश्यतःसिंह
निपातमुग्रं श्रधोमुखस्योपरिपुष्पवृष्टिःपपातविद्याधरहस्तमुक्ता ६० उत्तिष्ठवत्सेत्यमृतायमानंवचोनिशाम्यो
त्थितमुत्थितःसन् ददर्शराजाजननीमिवस्वांगामग्रतःप्रस्नुतिनीनसिंहं ६१ तविस्मितंधेनुरुवाचसाधोमायामयं
श्राव्यपरिक्षितोसि कृषिप्रभावान्मयिनांतकोपिप्रभुःप्रहर्त्तुंकिमुतान्यहिंस्राः ६२ भक्त्यागुरौमय्यनुकंपयाच
प्रीतास्मितेवत्सवरंवृणीष्व नकेवलानांपयसांप्रसूतिमवेहिमांकामदुघांप्रसन्नं ६३ ततःसमानीयसमानितार्थी
हस्तौस्वहस्तार्जितवीरशब्दः वंशस्यकर्त्तारमनंतकीर्तिंसुदक्षिणायांतनयंययाचे ६४ संतानकामायतथेतिकामं
राज्ञेप्रतिश्रुत्यपयस्विनीसा दुग्धापयःपत्रपुटेमदीयंपुत्रोपभुंक्ष्वेतिनमादिदेश ६५ वत्सस्यहोमार्थविधेश्चशे
षंगुरोरनुज्ञामधिगम्यमातः ॐधस्यमिष्टामितवोपभोक्तुंप्रसीदमुर्व्याइवरक्षितायाः ६६ इत्थंसितीक्ष्णेनवसिष्ठ
धेनुर्विज्ञापिताप्रीतनरावभूव तदन्वितोहैमवताच्चकुक्षेःप्रत्यायवावाश्रममश्रमेण ६७ तस्याःप्रसन्नेंदुमुखप्रसा
दंगुरुंपाणांगुरवेनिवेद्य प्रहर्षचिह्नानुमितंप्रियायैशशंसवाचापुनरुक्तयेव ६८ सनंदिनीस्तन्यमनिंदितात्मा
सहत्सलोवत्सतृतावशेषं पपौवसिष्टेनकृताध्वनुज्ञःशुभंयशोभूयइवाधितृष्णः ६९ प्रातर्यथोक्तंहुतपावकांतेप्रा
स्थानिकंस्वस्त्ययनंप्रयुज्य तौदंपतीस्वांप्रतिराजधानीप्रस्थापयामासवशीवसिष्ठः ७० प्रदक्षिणीकृत्यहुतंहुतांश

नंतरंभर्तुररुंधतीव्व धेनुंसवत्सांचनृपः प्रतस्थेसन्मंगलोदग्रतरप्रभावः ७१ श्रोत्राभिरामध्वनिनारथेनसधर्मपत्नीसहितः महिष्णुः ययावनुद्घातसुखेनमार्गंस्वेनेवपूर्णेनमनोरथेन ७२ तमाहितौत्सुक्यमदर्शनेनप्रजाः प्रजार्थेव्रतकर्शितांगं नेत्रैः पयुस्तृप्तिमनाप्नुवद्भिर्नवोदयंनाथमिवोषधीनां ७३ पुरंदरश्रीः पुरमुत्पताकंप्रविश्यपौरैरभिवंद्यमानः भुजेभुजंगेंद्रसमानसारभूयः सभूमेर्धुरमाससंज ७४ अथनयनसमुत्थंज्योतिरत्रेरिवोः सुरसरिदिवतोवह्निनिष्ट्यूतमग्रं नरपतिकुलभूत्यैगर्भमाधत्तराज्ञीगुरुभिरभिनिविष्टैलोकपालानुभावैः ७५ इतिश्री रघुवंशेमहाकाव्येकविश्रीकालिदासकृतौनंदिनीवरप्रदानोनामद्वितीयःसर्गः २ अथप्रसिद्धेभगुरुस्थितोदयं सर्वाजनोहीप्सणकामुदीक्षणं निदानमिस्वाकुकुलस्यसंततेसुदक्षिणोदाहरदक्षलक्षणं दधौ १ मुखेनसाकेतवधूजनस्य दृशांगयाष्टिः परिमेयभूषणा स्थितालसतारकरूपेंदुमंडलाविभातकल्पोरजनीव्यडंबयत् २ शरीरसादादसमग्रभूषणा मुखेनसालक्ष्यतराधपांडुना तनुप्रकाशेनविचेयतारकाप्रभातकल्पाशशिनेवशर्वरी ३ तदाननं मृत्सुरभिक्षितीश्वरोरहस्युपाघ्रायनतार्पिमायतौ करीवसिक्तंपृषतैःपयोमुचांशुचिव्यपायेवनराजिपल्वलं ३ दिवं मरुत्वानिवभोक्ष्यतेमहीदिगंतविश्रांतरथोहितत्सुतः अतोभिलाषप्रथमंतयाविधेमनोबबंधान्यरसान्विलंघ्यसा ४ नमेद्रियाशंसतिकिंचिदाशितंस्पृहावतीवत्स्फुकेषुमागधी इतिस्मपृच्छत्पनवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ५ उपेत्यसादोहददुःखशीलतांयदेववंद्यंतदपश्यदार्तवं नहीष्टमस्यारुरिदेवपिभूपतेरभूदनाधंधमधिज्यधन्वनः ६ क्रमेणनिस्तीर्यचदोहदव्यथांप्रचीयमानावयवाराराजसा पुराणपत्रापगमादनंतरंलतेवसन्नधमनोज्ञपल्लवा ७ दिनेषुगच्छत्सुनितांतपीवरंतदीयमानीलमुखंस्तनद्वयं तिरश्चकारभ्रमरावलीढयोः सुजातयोःपंकजकोशयोःश्रियं ८ निधानगर्भामिवसागरांबरांशमीमिवाध्यंतरलीनपावकां नदीमिवांतःसलिलांसरस्वतीं नृपःससत्वांमहिषीममन्यतः ९ प्रियानुरागस्यमनःसमुन्नतंभुजार्जितानांचदिगंतसंपदां यथाक्रमंपुसवनादिकाःक्रियाः धृतश्चधीरःसदृशीर्व्यधत्तसः १० सुरेंद्रमात्राश्रितगर्भगौरवान्न्यवर्तयत्पुंसवनक्रियागृहात्

291
1484

तयोपचारांजलिविघ्नहस्तयानेनंदपारिप्लवनेत्रयानृपः ११ कुमारभृत्याकुशलैरधिष्ठितंभिषग्भिरासेरथगर्भभर्मणि पतिःप्रतीतःप्रसवोन्मुखीप्रियांददर्शकालेदिवमभ्रितामिव १२ ग्रहस्थितःपंचभिरुच्चसंश्रयैरयुग्मगैःसूचितभाग्यसंपदं असूतपुत्रंसमयेग्रचीसमाग्निसाधनाशक्तिरिवार्थमक्षयं १३ दिशःप्रसेदुर्मरुतोववुःसुखाःप्रदक्षिणार्चिर्हुतमग्निरादद बभूवसर्वंशुभशंसितत् क्षणंभवाहिलोकायुदयायतादृशं १४ अरिष्टशय्यांपरितोविसारणासुजन्मनस्तस्यनिजेनतेजसा निशाथदीपाःसहसाहतत्विषोबभूवुरालेख्यसमर्पिताइव १५ जनायशुद्धांतचरायशंसतेकुमारजन्मामृतसाभ्यितासरे अदृश्यमासीत्लयमेषभूपतेःशशिप्रभंछत्रमुभेचचामरे १६ निवातपद्मस्तिमितेनचक्षुषान्पस्यकांतंपिबतःसुताननं महोदधेःपूरइवेंदुदर्शनाद्बुरुःप्रहर्षःप्रबभूवनात्मनि १७ सजातकर्मण्यखिलेतपस्विनातपोवनादेत्यपुरोधसाकृते दिलीपसूनुर्मणिराकरोद्भवःप्रयुक्तसंस्कारइवाधिकं बभौ १८ सुखश्रवामंगलतूर्यनिःस्वनाःप्रमादनृत्यैःसहवारयोषितां नकेवलंसद्मनिमागधाधिपतेःपथिव्यजृंभंततदिवौकसामपि १९ नसंयतस्तस्यबभूवरक्षितुर्विसर्जयंसुतजन्महर्षितः कृणाभिधानात्त्वयमेवकेवलंतदापितॄणांमुमुचेसबंधनात् २० ऋतस्ययायादयमंतमर्भकस्तयापरेषांयुधिचेतिपार्थिवः अवेक्ष्यधातोर्गमनार्थमर्थवित्चकारनाम्नारघुमात्मसंभवं २१ पितःप्रयत्नात्समवाप्तसंपदःशुभैःशरीरावयवैर्दिनेदिने पुपोषवृद्धिंहरिदश्वदीधितेरनुप्रवृत्तादिवबालचंद्रमाः २२ उमाकपर्दोपचितंजन्मनायथायथाजयंतेनशचीपुरंदरौ तथानृपःसूनुसुतेनमागधीनंदेनतुस्तत्सदृशेनतत्समौ २३ रथांगनाम्नोरिवबंधनंबभूवयस्यमपरस्परश्रय विभक्तमप्यक्षसुतेनतन्नयोःपरस्परस्योपरिनव्यहीयत २४ उवाचधात्र्याप्रथमोदितंवचोययोस्तदीयामवलंब्यचांगुलिं अभूच्चनम्रःप्रणिपातशिक्षयापितुर्मुदंतेनततानसोर्भकः २५ तमंकमारोप्यशरीरयोगजैः सुखैर्निषिंचंतमिवामृतंत्वचि उपांतसंमीलितलोचनोनृपश्चिरात्सुतस्पर्शरसज्ञतांययौ २६ श्रमंस्मचांनेनपराद्यजन्मनास्थितेरभक्तास्थितिमंतमन्वयं स्वमूर्त्तिभेदेनगुणाग्र्यावर्तिनापतिःप्रजानामिवसर्गमात्मनः २७ सवृत्तचौलश्चलकाकपक्षकःमात्र

पुत्रैः सवयोभिरन्वितः लिपेर्यथावद्ग्रहणेनवाङ्मयंनदीमुरुवेनवसमुद्रमाविशत् २८ अथोपनीतंविधिवद्विपश्चि
त्तविनिम्युरेनंगुरवोगुरुप्रियं अवंध्ययत्नाश्चबभूवुरर्थकेक्रियाहिवस्तूपहितात्प्रसीदति २९ धियःसमग्रैःसगुणैर्
दारधीः क्रमाच्चतःस्नेश्चतुरर्णवोपमाः तनारविद्याःपवनातिपातिभिर्दिशोहरिद्भिर्हरितामिवेश्वरः ३० त्वंवंस
मेभ्यायरिधायरोरवीमन्निस्तास्तांपितुरेषमंत्रवित् नकेवलंतद्गुरुरेवपार्थिवश्चितावभूदेकधनुर्धरोपिसः ३१ महो
क्षतांवत्सतरःस्पृशन्निवद्विपेंद्रभावंकलभःश्रयन्निव रघुक्रमाद्यौवनभिन्नशैशवःपुपोषभागीयमनोहरंवपुः ३२ अ
थास्यगोदानविधेरनंतरंविवाहदीक्षांनिसवर्न्नयद्गुरुः नरेंद्रकन्यास्तमवाप्यसत्पतिंतमोपहंरत्नसुताःइवाकभूः ३३ यु
वायुगव्यायतबाहुरंसलोकपाटवक्षाःपरिणद्धकंधरः वपुःप्रकर्षादजयद्गुरुंरघुस्तयापिनीचैर्विनयादद्दृश्यत ३४
ततःप्रजानांचिरमात्मनाधृतांनितांतगुर्वीलघयिष्यताधुरं निसर्गसंस्कारविनीतइत्यसौनृपेणचक्रेयुवराजशब्दभा
क् ३५ नरेंद्रभूलायतनादनंतरंतदास्यदेश्रीर्युवराजसंज्ञितं अगच्छदेनंगुणभिलाषिणीनवावतारंकमलादि
वोत्पलं ३६ विभावसुःसारथिनेववायुनाघनव्यपायेनगभस्तिमानिव बभूवतेनातितरांसुदुःसहःक्षटप्रभेदनकृ
वपार्थिवः ३७ नियुज्यतंहोमतुरंगरक्षणेधनुर्धरंराजकतौरनुद्रुतं अपूर्णमेकेनशतक्रतूपमःशतक्रतूनामपवि
घ्नमापसः ३८ अतःपरंतेनमखायययज्वनातुरंगमुत्कृष्टमनर्गलंपुनः धनुर्भृतामग्रतएवरक्षतांजहारशत्रुः कि
लगूढविग्रहः ३९ विषादलुप्तप्रतिपत्तिविस्मितकुमारसैन्यंसपदिस्थितंततत् वसिष्ठधेनुश्चयदृच्छयागताक्षतश्र
मावादृश्योथनंदिनी ४० स्वेदांबुनामार्जयपुत्रलोचनेममैवयेनेहनुरंगमीक्ष्यसे धेन्वानिशाम्येतिवचःसमीरितम्
रंपरामायदिलीपनंदनः ४१ तदंगनिष्यंदजलेनलोचनेप्रमृज्यपुण्येनपुरस्कृतःसतां अनीदृशैरप्युपपन्नदर्शनो
बभूवमोघेषुदिलीपनंदन ४२ सपूर्वतःपर्वतपक्षशातनंददृशेदिवंनरेंद्रसंभवः पुनःपुनःसूतनिषिद्धचापलंहरंत
मध्वरथरश्मिसंयतं ४३ शितस्तमक्ष्णामनिमेषवृत्तिभिर्हरिविदित्वाहरिभिश्चवाजिभिः अवोचदेनंगगनस्पृशा
रघुःस्वरेणधीरेणनिवर्त्तयन्निव ४४ मरुत्वतोवंशभृतांप्रथमोमनीषिभिस्त्वमेवदेवेंद्रयतोनिगद्यसे अजस्रदीक्षाप्रयत

293
1934

स्यमद्वरोः क्रियाविघातायकथंप्रवर्त्तसे ४५ त्रिलोकनाथेनसदामखद्विषस्त्वयानियम्याननुदिव्यचक्षुषा सचस्त्वयंकर्म
सुधर्मचारिणांत्वमंतरायोभवसिच्युतोविधेः ४६ तदंगमग्र्येमघवन्महाक्रतोरमुंतुरंगंप्रतिभोक्तुमर्हसि पथःश्रुतेर्दर्श
यितारईश्वरामर्लोमसामाददतेनपथितं ४७ इतिप्रगल्भंरघुणासमीरितंवचोनिशाम्याधिपतिर्दिवौकसां निवर्त्तया
मासरथंसविस्मयःप्रचक्रमेचप्रतिवक्तुमुत्तरं ४८ पदात्यराजन्यकुमारतन्त्रथायशस्करस्यंपरतोयशोधनैः जगत्त्रका
शंतदशेषभाज्ययाभवद्गुरुर्लघयितुंसमोद्यतः ४९ हरिर्यथैकापुरुषोत्तमःस्मृतोमहेश्वरस्त्र्येकपुरत्रनापरः तथाविदु
र्मामुनयःशतक्रतुंहितीयगामीनहिशब्दपूर्वनः ५० अतोयमश्वःकपिलानुकारिणापितुस्तदीयस्यमयापहारितः अलं
प्रयत्नेनतवात्रमानुगाःपदंपदव्याःसगरस्यसंतते ५१ ततःप्रहस्यापगयःपुरंदरंपुनर्बभाषेनुरगःस्फुरन्मणिः गृहाणश
स्त्रंयदिगर्विणंक्षतेनखल्वनिर्जित्यरघुंक्रतौभवान् ५२ सएवमुक्तामघवंतमुन्मुखःकरिष्यमाणःसशरंशरासनं अ
तिष्ठदालीढविशेषशोभिनावपुःप्रकर्षेणविडंबितेश्वरः ५३ रघोरवष्टंभमयेनपत्रिणार्त्तादक्षेतागोत्रभिदत्यमर्षणः
नवांबुदानीकमुरुस्फुलिंगठेनधनुष्मताघंसमधत्तसायकं ५४ दिलीपसूनोःसहहृद्भुजांतरंप्रविश्यभीमासुरशोणितोक्षि
तः पपावनास्वादितपूर्वमाशुगःकुतूहलेनेवमनुष्यशोणितं ५५ हरेःकुमारोपिकुमारविक्रमःसुरद्विषास्फालनकर्कशां
गुलौ भुजेशार्ङ्गपत्रलताक्रियोचितेक्षनामचिन्हंनिचखानसायकं ५६ जाहाम्चान्येनमयूरपक्ष्मणाशरेणशात्रवस्यम
हाशनिध्वजं चुकोपतस्मैसभृशंसुरश्रियःप्रसह्यकेशाव्यपरोपणादिव ५७ तयोःपुरास्थितसिद्धसैनिकंगरुत्मदाशी
विषर्षभादर्शनः बभूवयुत्थंतुमलंजघिणोरधोमुखरुर्ध्वमुखश्चपत्रिभिः ५८ अतिप्रबंधप्रहितास्त्रसृष्टिभिस्तमाश्रये
दुःप्रसहस्यतेजसः शशाकनिर्वापयितुंनवासवःस्वतश्च्युतवन्हिमिवाद्रिरंबुदः ५९ ततःप्रकोष्ठार्हरिचंदनांकितंभ्रम
थ्यमानार्णवधीरनादिनी रघुःशशांकार्धमुखेनपत्रिणाशरासनज्यामलुनाद्विडोजसः ६० सचापमुत्सृज्यविवृद्धमं
त्रःप्रणाशनायप्रबलस्यविद्विषः महीधपंसंव्यपरोपणोत्थितंस्फुरत्प्रभामंडलमस्यमाददे ६१ रघुर्मृगेंद्रासितनना
दितःपपातभूमौसहसैनिकाश्रुभिः निमेषमात्रादवधूतयद्ध्वजांसहोत्थितःसनिकहर्षनिःस्वनैः ६२ तथापिशस्त्रव्यव

हारनिष्ठुरविपक्षभावेचिरमस्यतस्थुषः तुतोषवीर्यातिशयेनरत्नहापदंहिसर्वत्रगुणेर्निधीयते ६२ असंगमाद्विघ्नपतो
रवत्रयानमेतस्यनविषाढमायुधं अवेहिमांप्रीतमृतेतुरंगमाद्वरंवृणीघ्वेतिनमाहवासवः ६३ ततोनिषंगादसमग्रमु
धृतंसुवर्णपुंखरुचांतिरंतांगुलि नरेंद्रसूनुःप्रतिसंहरन्विषुंप्रियंवदंप्रत्यवदत्सुरेश्वरं ६४ अमोघमस्त्रंध्रियदिमन्यसंज्ञो
ततःसमाप्तविधिनावकर्मणि अजस्रदीक्षाप्रयतःसमाहुरुःक्रतोरशेषेणफलेनयुज्यतां ६५ यथाचरत्नांतमिमंसदागु
नास्खिलोर्वीनैकांशतयादुरासदः तवावसंदशहरादहिंशांपतिःश्रुणोतिदेवेशतयाविधीयतां ६६ तथेतिकामंप्रतिपुश्च
वानूरघोरर्थागतंमातलिसारथिर्यथौ नृपस्यनातिप्रमनाःसदाग्रहंसुदक्षिणासूनुरपिन्यवर्त्तत ६७ तमभ्यनंदत्स्वय
मंप्रबोधितःप्रजेश्वरःशासनहारिणाहरेः परामृशन्हर्षचलेनपाणिनातदीयमंगकुलिशांकृतेंकितं ६८ इतिस्तितीक्ष्णा
नवतिनवाधिकांमहाक्रतूनांमहनीयशासनः समारुरुक्षुर्दिवमायुषःक्षयेतनानसोपानपरंपरामिवा ६९ अथसविष
यव्यावृत्तात्मायथाविधिसूनवेनृपतिककुदंदत्वायूनेमितानपचारणं मुनिवनतरुछायांदेव्यातयासहशिश्रियेगति
तवयसामिक्ष्वाकूणामिदंहिकुलव्रतं ७० इतिश्रीरघुवंशेमहाकाव्येकविश्रीकालिदासकृतौदिलीपवनप्रस्थानोनामत
तीयःसर्गः ३ साराज्यंगुरुणादत्तंप्रतिपद्याधिकंबभौ दिनांतेनिहितंतेजःसवित्रेवहुताशनः १ न्यस्तशस्त्रंदिली
पंचतंचभुक्तवृषांपतिं राजामुधृतनारीचित्तदिशात्पमिवार्पितं २ दिलीपानांतरंसोढुंतेनिशाम्यप्रतिषेधनं पूर्वप्रभू
मितेराज्ञांतद्धयोर्मिरिवोत्थितः २ पुरुहूतध्वजस्यवतस्योन्नयनपंकजः नवाभ्युत्थानदर्शिन्योननंदुःसुप्रजाःप्रजाः
३ समंवसमाक्रांतंदूर्यहरदगामिना तेनसिंहासनंपित्र्यमखिलंचारिमंडलं ४ छायामंडललक्षणंतमदृश्य
किलस्वयं पद्मापद्मानपत्रेणभेजेसाम्राज्यदीक्षितं ५ परिकल्पितसांनिध्याकालेकालेचबंदिषु स्तुत्यंस्तुतिभिर्
र्थ्याभिरुपतस्थेसरस्वती ६ मनुप्रभृतिभिर्मान्यभुक्तायद्यपिराजभिः तथाप्यनन्यपूर्ववनम्यांसीद्वसुंधरा ७
सहिसर्वस्यलोकस्ययुक्तदंडतयामनः आदेदनातिशीतोष्णानभस्वानिवदक्षिणः ८ मृदोत्कंठाःकृतास्तेनगुणाधि
कतयागुरौ फलेनसहकारस्यपुष्पोद्गमइवप्रजाः ९ नयविद्भिर्नयेराज्ञिसदस्यैरुपदर्शितं पूर्वएवाभवत्पक्षस्तस्मि

295
Raghu 84

न्नाभवदुन्नतः १० पंचानामपिभूतानांमुत्कर्षंपुपुषुर्गुणाः नवेतस्मिन्महीपालेसर्वंनवमिवाभवत् ११ यथाप्रत्यूष
नाच्चंद्रःप्रतापात्तपनोयथा तथवसोमूदन्वथोराजाप्रकृतिरंजनात् १२ कामंकर्णांतविश्रांतविशालेतस्यलोचने च
क्षुषात्रातुशास्त्रेणसूक्ष्मकार्यार्थदर्शिना १३ लब्धप्रशमनस्वस्थमथैनंसमुपस्थिता पार्थिवश्रीर्हितीयेवशरत्पंकज
लक्षणा १४ निर्दृष्टलघुभिर्मार्गैर्मुक्तवर्त्मासुदुःसहः प्रतापस्तस्यभानोश्चयुगपद्भानेवादिशः १५ अधिराजमा
युधंकर्तुंसमयोयंरघोरिति स्वधनुःशंकितेनेवसंजहारहरद्वारघुजत्रेधनुर्दधौ प्रजार्थ
साधनेतोहिपर्य्यायोद्यतकार्मुकौ १७ पुंडरीकातपत्रस्तंविलसत्कांचनामरः ऋतुविडंबयामासनपुनःप्रापतद्धियं
१७ प्रसादसुमुखेतस्मिंश्चंद्रेचविशदप्रभे तदाचसुप्रतांप्रीतिरासीत्सुमरसाद्वयोः १८ हंसस्त्रेणीषुतारासुकुमुदवस
च्चवारिष्ट विभूतयस्तदीयानांपर्यस्तायशसामिवा १९ इक्षुच्छायानिषादिन्यस्तस्यगोप्तुर्गुणोदयं आकुमारकथोद्गा
शालिगोप्योजगुर्यशः २९ प्रसस्तादोदयादंभःकुंभयोनेर्महौजसः रघोःपरिभवात्रोकिंचुसुभद्विषतामनः २२ मदो
दग्राःककुभंतःसरितांकूलमुद्रजाः लीलारवेलमनुप्रापुर्महोक्षास्तस्यविक्रमं २३ प्रसवैःसप्तपर्णानांमदगंधिभि
राहृताः असूययेवतन्नागाःसप्तधैवप्रसुस्रुवुः २४ सरितःकुर्वतीर्गाधाःपथश्चायानकर्दमान् यात्रायैप्रस्थिता
सतंशक्रःप्रथमंवारत् २५ तस्मैसम्यक्क्रतोवन्हिर्वाजिनीराजनाविधौ प्रदक्षिणार्चिर्व्याजेनहस्तेनेवजयंददौ २५
सयुग्रमूलपर्यंतःभुजपार्ष्णिरयान्वितः षड्डिधंबलमादायप्रतस्थेदिग्जिगीषया २६ अवाकिरन्वयोरुस्थास्तंलाजैः
पौरयोषितः पृषतैर्मंदरोधूतैःक्षीरोर्मयइवाच्युतं २७ सययौप्रथमंप्राचीतुल्यप्राचीनबर्हिषा अहितानिलोद्धू
तैस्तज्जयन्निवकेतुभिः २८ रजोभिस्तुरगोत्कीर्णैर्गजस्नघनसन्निभैः भुवनस्तलामिवश्यामकुर्वन्व्यामवभूतलं
२९ प्रतापोग्रेततःशश्वत्पुरागास्तदनंतरं ययोपश्चाद्वथानीकंचतुस्कंधेवसावभूः ३० मरुत्पृष्ठान्युदंशांसिनाव्याः
सुप्रतरानदीः विपिनानिप्रकाशानिशक्तिमत्वाच्चकारसः ३१ पुरोगैःकलुषास्तस्यसहप्रस्थायिभिःकृताः पश्चात्प्रया
यिभिःपंकाश्चक्रिरेमार्गानिम्नगाः ३२ ससेनोमहतीकर्षन्पूर्वसागरगामिनीं वनौहरजटाभ्रष्टंगंगामिवभगीरथः ३३

त्यानितेःफलमुच्चावतेर्भयैश्चबहुधीन्पेः तस्यासीदुत्त्वणोमार्गःपादपैरिवदंतिनः ३३ पौरस्त्यानेवमाक्रामंल्लांस्तान्
जनपदान्जयी प्रातापलीवनश्यामामुपकंठंमहोदधेः ३४ अनम्राणांसमुद्धर्त्तुस्तस्मात्सिंधुरयादिव आत्मासं
रक्षितुःसुह्मैर्वृत्तिमाश्रित्यवेतसी ३५ वंगानुत्वायतरसानितानासाधनोर्त्यतान् निचखानजयस्तंभान्गंगास्त्रोतोंत
रेषुसः ३६ भयोत्सृष्टविभूषाणांतेननकरलयोषितां अलकेषुचमूरेणश्चूर्णप्रतिनिधीकृतः ३७ अपादपद्मप्रणताःक
लमाइवतेरघुं फलैःसंवर्धयामासुरुद्वानप्रतिरोपिताः ३७ सतीर्त्वा कपिशांसैन्यैर्बन्धद्विरदसेतुभिः उत्कलादर्शिते
पथःकलिंगाभिमुखोययौ ३९ सप्रतापमहेंद्रस्यमूर्द्धिनीक्ष्णंन्यवेशयत् अंकुशाद्विरदस्मेवयंतागंभीरवेदिनः ३९ प्र
तिजग्राहकालिंगस्तमस्त्रैर्गजसाधनः पक्षच्छेदोद्यतंशक्रंशिलावर्षावृपर्वतः ४० हिषांविषह्यकाकुत्स्थस्तत्रनाराच
दुर्दिनं सन्मंगलस्नातइवप्रतिपेदेजयश्रियं ४१ वामव्यास्तविनिर्धूतात्पसाक्थान्महोदधेः गजानीकात्सकालिं
गैतार्क्ष्यःसर्पमिवादद ४२ तांबूलीनांदलैस्तत्ररचितापानभूमयः नालिकेरासवंयोधाःशात्रवंचपुंपपुर्यशाः ४३
गृहीतप्रतिमुक्तस्यसधर्मविजयीनृपः श्रियंमहेंद्रनाथस्यजहारनतुमेदिनीं ४४ ततोवेलातटेनवफलवत्पूगमा
लिना अगस्त्याचरितामाशामनाशास्यजयोययौ ४५ ससैन्यपरिभोगेनगजदानसुगंधिना कावेरीसरितांपत्युःशो
कनीवायामिवाकरोत् ४६ वेलेरध्युषितास्तस्याविजिगीषोर्गताध्वनः मरिचोद्धांतहारितामलयाद्रिरुपत्यकाः ४७
ससंजुरुच्चसुगानामेलानांमुक्तिस्मवः तुल्यगंधिषुमत्तेभकटेषुफलरेणवः ४८ भोगिविष्टनमार्गेषुचंदनामुत्पति
नांसमर्पितं नाश्वंसत्कारिणांग्रेवंत्रिपदिष्ठेदिनामपि ४९ दिशिप्रदायतेतजोदक्षिणस्यांरवेरपि तस्यांमनरघोःपां
आःप्रतापनविषेहिरे ४९ ताम्रपर्णीसमेतस्यमुक्तासारंमहोदधेः तेनिपत्यददुस्तस्मैयशःस्वमिवसंचितं ५० यस्मै
सनिर्विश्ययथाकामंतटेषालीढचंदनौ नचदस्तनाविवदिशास्तस्याःशैलोमलयदुद्रुवौ ५१ तस्यानीकैर्विसर्पद्भि
रपरांतजयोद्यतैः रामास्त्रोत्सारितोप्यासीत्सह्यलग्नइवार्णवः ५२ भयोत्सृष्टविभूषाणांतननकरलयोषितां अल
केषुचमूरेणश्चूर्णप्रतिनिधीकृतः ५४ मरुलामारुतोधूतमगमत्कैतकंरजः तद्योधधारबाणानामयत्नपटवासतां
५५

अभ्यभूयतवाहानांचरतोगात्रसिंजितैः मर्मरःपवनोत्धूतराजतालीवनध्वनि ५६ खर्जूरीस्कंधनधानांमदो
द्धारसुगंधिषु केटपुकरिणोपेतुःपुन्नागेभ्यःशिलीमुखाः ५७ अवकाशंकिलोदन्वान्रामायार्थयतोदधौ अ
परांतमहीपालव्याजेनरघवेकरं ५८ मत्तैरदेभेनोत्कीर्णव्यक्तविक्रमलक्षणं त्रिकूटमेवतत्रोच्चैर्जयस्तंभंचकार
सः ५९ पारसीकांस्ततोजेतुप्रतस्थेस्थलवर्त्मना इंद्रियाख्यानिवरिपूंस्तत्वज्ञानेनसंयमी ६० यवनीमुखपद्मा
नांसेहेमधुमदंनसः बालातपमिवाद्यानांप्रकालजलदोदयः ६१ संग्रामस्तुमलास्तस्यपाश्चात्यैरश्वसाधनैः
शार्ङ्गकूजितविज्ञेयप्रतियोधोरजस्वभूत् ६२ भल्लापवर्जितैस्तेषांशिरोभिःस्मश्रुलैर्महीं तस्तारसरघाव्याप्तैः
ससौद्रपटलैरिव ६३ अपनीताशिरस्त्राणैःशिरोभिस्तेशरण्ययुः प्रणिपातप्रतीकारःसंरंभोहिमहात्मनां ६४
विनयंतेस्मनद्योधामधुभिर्विजयश्रमं आस्तीर्णाजिनरत्नासुद्रासावलयभूमिषु ६५ ततःप्रतस्थेकावेरीभास्वानि
वरघुर्दिशं शरैरुत्तंसयिष्यन्नरसानिव ६६ जितोजनप्यस्तानेवकृत्वोरश्यपुरःसरान् महार्णवमिवो
र्वाग्निःप्रविवेशोत्तरापथं ६६ विजीनाश्वश्रमास्तस्यसिंधोस्तीरविचेष्टनैः दधुर्वाजिनःस्कंधालुग्नकुंकुमकेस
रान् ६७ तत्रहूणावरोधानांभर्तृषुव्यक्तविक्रमं कपोलपाटनादर्शिबभूवरघुचेष्टितं ६८ कांबोजाःसमरेसोढुं
तस्यवीर्यमनीश्वराः गजालानपरिक्लिष्टरक्षोढुःसार्थमानताः ६९ तेषामश्वभूयिष्ठास्तुंगद्रविणराशयः उपदा
र्विविशुःशश्वन्नोत्सवःकोशलेश्वरे ७० ततोगोरीगुरुंशैलमारुरोहाश्वसाधनः वर्धयन्विबुधस्त्रीणां
भिः ७१ शरासवुल्बसत्त्वानांसैन्यघोषप्रसंभ्रमं गुहाशायनांसिंहानांपरिवृत्यावलोकितं ७२ भूर्जेषुर्मर्मरी
भूतैःकीचकध्वनिहेतवः गंगासीकरिणोमार्गे मरुतस्तंसिषेविरे ७३ विश्रम्यमुर्मरुणांछायास्वध्यास्यसनि
काः हृषदश्वासितोत्सर्गानिषण्णमृगनाभिभिः ७४ सरलासक्तमातंगग्रैवेयस्फुरितत्विषः आसन्नोषधयोनैनं
मरुन्हरीपिकाः ७५ तस्योत्तरेणनिवासंपुकंठरज्जुसतत्वच गजधर्मकिरातेभ्यःशरांसुर्हरवारवः ७६ तत्र
यूद्धंरघोर्घोरंपार्वतीयगणैरभूत् नाराचैस्तपणीयाग्रमतिपेषात्पतितानलं ७७ शररुग्णवसंकेतानसंकृत्या

विरतोत्सवान् जयोदाहरणंवाद्योर्गापयामासकिंनरान् ७८ परस्परस्यविज्ञानस्तेषुपायनपाणिषु राज्ञाहिमवतः सारोराज्ञःसारोहिमाद्रिणा ७९ तत्रास्तोत्र्यंयशोराशींनिवेश्यावरुरोहसः पौलस्त्यतुलितस्योद्वाधोदिनइवाद्रियुं ८० चकंपेतीर्णलोहित्यतस्मिन्नाग्न्यातिथेश्वरः तरुजालाननाप्राप्तैःसहकालागरुद्रुमैः ८१ नप्रसेहेसरुधोर्क मेधारावंदुदुहिनै रथवर्मरजोप्यस्यकुतएवपताकिनी ८२ तमीशःकामरूपाणामत्यारूढंलवित्रकैः भेजेभिन्नकटैर्नागै र्न्यानुपरुरोधयेः ८३ कामरूपेश्वरस्तस्यहेमपीठाधिदेवतां रत्नपुष्पोपहारेणलोकायामासिवान्पदयोः ८४ इतिजित्वादिशो जिग्मुर्न्यवर्त्तन्तरथोधतं रजोविश्रमयन्राज्ञांछत्रशून्येषुमौलिषु ८५ सविश्वजितमारेभेयज्ञंसर्वस्वदक्षिणं आदानहि विसर्गायसतांवारिमुचामिव ८६ सत्रोत्तसचिवसखः पुरस्क्रियाभिर्गुणैर्गीभिःशमितपराजयव्यलीकान् काकुत्स्थाश्चिरविर होत्सुकावरोधान्राजन्यान्स्वपुरनिवर्त्तयेनुमेने ८७ तेरवाध्वजकुलिशातपत्रचिन्हंसम्राजश्चरणयुगंप्रसादलभ्ये प्रस्थाने प्रणतिभिरंगुलीषुचक्रुर्मौलिस्फुरच्युतमकरंदरेणुगौरं ८८ इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौरघुदिग्विजयोनाम चतुर्थोऽसर्गः ४ तमध्वरेविश्वजितिक्षितीशंनिःशेषविश्राणितकोशजातं उपात्तविद्यागुरुदक्षिणार्थी कौत्सःप्रपेदेवर तंतुशिष्यः १ समृन्मयेवीतहिरण्मयत्वात्पात्रेनिधायार्घमनर्घशीलः ऋतप्रकाशंयशसाप्रकाशःप्रत्यर्घ्यगामातिथिमा तिथेयः २ तमर्चयित्वाविधिवद्विधिज्ञस्तपोधनंमानधनाग्रयायी विशांपतिर्विष्टरभाजमात्मकृतांजलिःकृत्यविदित्युवा च ३ अप्यग्रणीर्मंत्रकृतामृषीणांकुशाग्रबुद्धेकुशलीगुरुस्ते यतस्त्वयज्ञानमशेषमाप्तंलोकेनचैतन्यविमाप्णवेमः ४ कायेनवाचामनसाचशश्वद्दर्जिष्णो धर्मविलोपितप्तं आपाद्यतेनव्ययमंतरायैः काश्चिन्महर्षेस्त्विधंतपस्तत् ५ आ धारबंधःप्रसवैःप्रयत्नैःसंवर्धितानांसुतनिर्विशेषं कच्चिन्नवाप्यादिरुपप्लवोवःश्रमच्छिदामाश्रमपादपानां ६ क्रिया निमित्तेषुपिवत्सलत्वादभग्नकामामुनिभिःकुशेषु तदंकशय्याच्युतनाभिनालाकच्चिन्मृगीणामनघाप्रसूतिः ७ निवर्त्तते यैनियमाभिषेकोयेभ्योनिवार्यांजलयःपितृणां तान्युत्तषष्टोत्तिलसंकतानिशिवानिवस्तीर्थजलानिकच्चित् ८ नीवार पाकादिकडंगरीयैरामृश्यतेजानपदैर्नकच्चित् कालोपपन्नातिथिकल्पमागवन्यशरीरस्थितिसाधनंवः ९ अथिप्रसन्नेन महर्षिणात्वंसम्यक्क्रियायानुमतोग्रहाय कालोत्ययंसंक्रमितुंद्वितीयंसर्वोपकारक्षममाश्रमंते १० तथार्हतोनाभिगमन

:श्रीः ९

299
1984

तृप्तंमनोनियोगक्रियपोत्सुकंमे अप्याज्ञयाशासितुरात्मनावाप्तोसिसंभावयितुंक्रतून्मां ११ इत्यर्घपात्रानुमितव्य यस्यरघोरुदारामपिगांनिशाम्य स्वार्थोपपत्तिंमनिदुर्बलाशस्तंप्रत्यवोचद्वतैरनुशिष्यः १२ सार्वत्रिनोवार्त्तमवेहिराजन्न थैकुतस्त्वाप्यनुभंप्रजानां सूर्यंतपत्यावरणायदृष्टेःकल्पंतलोकस्यकथंतमिस्रा १३ भक्तिःप्रतीक्षेषुकुलोचितातपू न्महाभागतयातिशेषे व्यतीतकालस्तहमभ्युपेतस्त्वामर्थिभावादितिमेविषादः १४ शरीरमात्रेणनरेंद्रतिष्ठन्त्याभासि तीर्थप्रतिपादितर्धिः आरण्यकोपात्तफलप्रसूतिस्तंबेननीवारइवावशिष्टः १५ स्थानावनेकनराधिपःसन्नकिंचनत्व मखजंविनाक्ति पर्यायपीतस्यसुरैर्हिमांशोःकलास्क्षयःश्लाघ्यतरोहिवृत्तेः १६ त्वदन्यतस्तावदनन्यकार्यागुर्वर्थमाहर्तुमहंयतिष्ठे स्वस्त्यस्तुतेनिर्गलितांबुगर्भशरद्घनंनार्दतिचातकोपि १७ एतावदुक्त्वाप्रतिपातुकामशिष्यंमहर्षेर्नृपतिर्निषिध्य किंवस्तुविद्वन्गुरवेप्रदेयंत्वयाकियेहतितमन्वयुंक्त १८ ततोयथावद्विहिताध्वरायतस्मैमयावेशविवर्जिताय च र्णाश्रमाणांगुरवेसवर्णोविचक्षणःप्रस्तुतमाचचक्षे १९ समाप्तविद्येनमयामहर्षिर्विज्ञापिताभूद्गुरुदक्षिणायै समर्चि तायास्तुचलितोपचारांतांभक्तिमेवागणयत्पुरस्तात् २० नि / र्बंधसंजातरुषार्थकार्श्यमविंतपित्रागुरुणाद्गुमुक्तः वित्त स्यविद्यापरिसंख्ययामेकोटीश्चतस्रोदशचाहरेति २१ सोहंसपर्याप्तविधिभाजनेनमत्लाभवंतप्रभुशब्दशेषं अभ्युत्सहसं प्रतिनोपरोद्धुमलंतरत्वाद्धुतनिःक्रियस्य २२ इत्थंद्विजेनद्विजराजकांतिरावेदितवेदविदांवरेण एनोनिरूपंद्वियरन्निरे नंजगादभूयोजगदेकनाथः २३ गुर्वर्थमर्थीकृतपारदृश्वारघोःसकाशादनवाप्यकामं गतोवदान्यांतरमित्ययंममाभूत्स रीवादनवावतारः २४ सत्वंप्रशस्तेमहितेमदीयेवसश्चतुर्थाग्निरिवाग्यगारे हित्वाप्यहान्यर्हसिसोढुमर्हन्यावद्यतमा धयितुंत्वदर्थंतथेति तस्यावितथांप्रतीतःप्रत्यग्रहीत्सागिरमग्यजन्मा गामात्तसारांधुरिणवेस्यनिक्षेप्तुमथैकमक्षरात् २६ विसिष्टमंत्रोक्षणजातभावादुदन्वदाकाशमहीधरेषु मरुत्सखस्यबलाहकस्यगतिर्विजन्यंनहिनश्चकार २७ अथाधिशिश्रियतः प्रदोषेरथंरघुःकालमनश्चयंगः सामंतसंभावनयैवधीरःकैलासनाथंतरसाजिगीषुः २८ प्रातः प्रयाणाभिमुखायतस्मैसविस्मयाकोशगृहस्यमध्येसृष्टिंशशंसुःपतितांनभस्तः २९ तंभूप

तिर्भासुरेहमराशिलब्धंकुबेरादभियास्यमानात् दिदेशकोत्सायसमस्तमेवश्रृंगंसुमेरोरिववज्रभिन्नं ३० जनस्यसाके
तनिवासिनस्तांद्रावण्यभूतामभिनंद्यसत्वो गुरुप्रदेयाधिकनिस्पृहोयीनृपोर्थिकामादुधिकप्रदश्च ३१ अथास्वामीशातवाहि
तार्थंप्रजेश्वरंप्रीतमनामनीषी स्पष्टंन्करेणानतपूर्वकायसंप्रस्थितावाक्यमुवाचकोत्सः ३२ किमत्रचित्रंयदिकामसूर्भूष्टेनः
स्थितस्याधिपतेःप्रजानां अचिंत्यनीयस्कृतवप्रभावोमनीषितंद्वारपियेनदुग्ध्य ३३ आज्ञास्यमन्यघुनरुक्तभूतेश्रेयांसि
सर्वाण्यधिजग्मुषस्ते पुत्रंलभस्वात्मगुणानुरूपंभवंतमीड्योभवतःपितेव ३४ इत्थंप्रयुज्याशिषमग्रजन्माराज्ञःप्रतीपायगुरुः
सकाशं राराजापिलेभसुतमाप्तुतस्मादालोकमर्कादिवजीवलोकः ३५ प्राप्तेमुहूर्त्तेकिलतस्यदेवीकुमारकल्पंसुषुवेकुमारं
अतःपिताब्रह्मणएवनाम्नातमात्मजन्मानमजंचकार ३६ रुपंतदोजस्वितदेववीर्यंतथैवनसर्गिकमुन्नतत्वं नकारणा
त्स्वाद्विभिदेकुमारःप्रवर्त्तितोदीपइवप्रदीपात् ३७ उपात्तविद्यविधिवद्गुरुभ्योयस्तयावनोद्भेदविशेषकांत श्रीर्गुणुकामापि
गुरोरनुज्ञांधिरवकन्यापितुराचकांक्षः ३८ अथेश्वरेणाथ कृताकानांस्वयंवरार्थंस्वसुरिंदुमत्या आत्मःकुमारानयनो
त्सुकेनभोजिनदूतोरघवेविसृष्टः ३९ तंश्लाघ्यसंबंधमसावि चिंत्यदारक्रियायोग्यदशंचपुत्रं प्रस्थापयामाससस्मन्यमन
मृधाविदर्भाधिपराजधानी ४० तस्यापकार्यारचितोपचारावन्येतराजानपदोपदाभिः मार्गानिवासामनुजेंद्रसूनोर्बभूवुर
द्यानविहारकल्पाः ४१ सनर्मदारोधसिशीकारार्द्रैमरुद्विरानर्त्तितनक्तमाले निवेशयामासविलंघिताध्वाक्लांतरंजाधू
सरकेतुसैन्यं ४२ अथोपरिष्टाद्भमरैर्नभस्तःमद्भिःप्राक्सूचितांतःसलिलप्रवेशाः निर्धौतदानामलगंडभित्तिर्वन्यःसरित्तोगे
जउन्ममज्ज ४३ निःशेषविस्रालितधातुनापिपप्रक्रियामृत्सवतत्परेषु नीलोधरिरोधशैवलेनशासनदंतहस्तेनाश्रमविकुंटि
तेन ४४ युग्मं संहारविक्षेपलघुक्रियेणहस्तेनतीराभिमुखैःसशब्दं बभौसभिंदन्नृतुहृतस्तरंगान्वायुर्गलाभंगइवप्र
वृत्तः ४५ शैलोपमःशैवलमंजरीणांजालानिकर्षन्नुतरासपन्नात् पूर्वंतदुत्पीडितवारिराशिःसरित्प्रवाहस्तटमुत्ससर्प ४६ मत्स्यैकनागस्यकपोलभित्त्योर्त्तदावगाहक्षणमात्रशांता वन्येतरानेकपदर्शनेनपुनर्दिदीपेमददुर्दिनश्रीः ४७ स
मच्छदक्षीरकटुप्रवाहमसह्यमाघ्रायमदंतदीयं विलंघिताघोरणतीव्रयत्नाःसेनागजेंद्राविमुखीबभूवुः ४८ सछि
न्नबंधद्रुतयुग्यशून्यंभग्नाक्षपर्यस्तरथंक्षणेन रामापरित्राणविहस्तयोधसेनानिवेशंतुमलंचकार ४९ तमापतंतंनृप

301
1984

तेरवध्योवन्यःकरातिश्चकानकुमारः निवर्त्तयिष्यन्विनिषेधनकुंभेजघाननात्यायतकृष्टचापः ५० सविधमात्रः
किलनागरूपमुत्सृज्यतद्विस्मितसैन्यदृष्टः स्फुरत्प्रभामंडलमध्यवर्त्तिकांतंववपुर्व्योमिचरंप्रपेदे ५१ अथप्रभावोपनतैः
कुमारंकल्पद्रुमोत्थैरवकीर्यपुष्पैः उवाचवाग्मीदशनप्रभाभिःसंवर्धितोरस्थलतारहारः ५२ मतंगशापादवलेपमूला
दवाप्तवानस्मिमतंगजत्वं अवेहिगंधर्वपतेस्तनूजंप्रियंवदंमांप्रियदर्शनस्य ५३ सचातुनीतःप्रणतेनपश्चान्मवायामहर्षि
मृदुतामगच्छत् उष्मत्वमग्र्यातपसंप्रयोगाच्छैत्यंहियत्नाप्रकृतिर्जलस्य ५४ इक्ष्वाकुवंशप्रभवोयदातिभेत्स्यत्पजः कुंभ
मयामुखेन मोक्ष्यसेत्वंनपुवेर्महिम्नातदित्यवोचत्सतपोनिधिर्मां ५५ सम्मोचितःसत्ववतातयाहंशापाच्चिरप्रार्थित
दर्शनेन प्रतिप्रियंचेन्द्रवतानकुर्यांरथाहियेस्यास्त्वपदोपलाद्वि ५६ संमोहनंनामसखेममास्त्रंप्रयोगसंहारविभक्तमंत्रं
त्रै गांधर्वमाधत्स्वयतःप्रथायोकुर्नचारिहिंसाविजयस्यहेतुः ५७ अलंक्रियामोपनियन्मुहूर्त्तंदर्पापरोभूःप्रहरन्नपित्वं न
स्मादुपस्पृदयतिप्रयोज्यमयित्वयानप्रतिषेधरोक्षं ५८ तथेत्युपस्पृश्यपयःपवित्रंसोमोद्भवायाःसरितोनृसोमः उदन्मुखः
सोस्त्रविदस्त्रमंत्रंजग्राहतस्मान्मिगृहीतशापात् ५९ एवंतयोरध्वनिदैवयोगादासेदुषोःसख्यमचित्यहेतु एकोययौचैत्रा
रथप्रदेशान्नृसोराज्यरम्यानपरोविदर्भान् ६० तंतस्थिवांसंनगरोपकंठेतदागमारूढगुरुप्रहर्षः प्रत्युज्जगामकृथकैशकेतुः
द्रष्टुंद्वयंद्वप्तइवोर्मिरिवोर्मिमाली ६१ प्रवेश्यचैनंपुरमग्रयायीनीचस्तयोपाचंदरदर्पितश्रीः मनेयथातत्रजनःसमेतोवै
दर्शमार्गंतुमजंगृहेभ्यः ६२ तस्याधिकारिपुरुषैःप्रणतेःप्रदिष्टंप्राग्द्वारवेदिविनिवेशितहेमकुंभा रम्यंरघुप्रतिधिनिःस
नूवोपकार्यंबिलमात्परामिवदृष्टिंमदनोध्युवास ६३ तत्रस्वयंवरसमाहृतराजलोकंकन्यालललामकमनीयमजस्यलि
प्सोः भावावबोधकलुषादयितेवरात्रीनिद्राचिरेणनयनाभिमुखीबभूवः ६४ तंकर्णभूषणनिपीडितपीवरांसंशय्योत्त
रच्छदविमर्दकृशांगरागं वैतालिकाललितबंधमनोहराभिःप्रबोधयन्तुषसिवाग्भिरुदारवाचः ६५ रात्रिंगतामतिमतां
वरमुंचशय्याधात्राहिधेवनन्नुधूर्जगतोविभाक्ति योमक्तत्तवविभन्निगुरुविनिद्रस्तस्यानवानपरधुर्यपदावलंबी ६६
निद्रावशेनभवतात्यनवेक्षमाणापर्युत्सुकत्वमवलानिशिरेवेंडितेव उलूकीविनोदयतियेनदिगंतलंबीसोपित्वदाननरुचि

विजहातिचंद्रः ६७ तद्दत्तलुनायुगपद्दान्मिषितेननावत्सद्यःपरस्परतुलामधिरोहतांद्वे प्रस्यंदमानपुरुषेनरतारमंत
श्रसुस्तवप्रचलितत्रामरंचपद्मं ६८ वृंतश्लथंहरतिपुष्पमनोकहानांसंसृज्यतेसरसिजैररुणांशुभिन्नैः स्वाभाविकप
रगुणेनविभातवायुःसौरभ्यमीप्सुरिवतेमुखमारुतस्य ६९ तास्तोदरेषुपतितंद्रुमपल्लवेषुनिश्वासहारगुलिकाविशदंहिमा
भः श्रमातिलब्धपरभागतयाधरोष्ठलीलास्मितंसदृशनार्द्धिरिवत्वदीपं ७० यावत्प्रतापनिधिराक्रमतेनभानुरुदाय
तावदरुणेनतमोनिरस्तं श्रयोधनाग्रसरतांत्वयिवीर्यातिकिंवारिपूंस्तवगुरुः स्वयमुद्धिनत्ति ७१ शिष्यांजहत्युभय
पक्षविनीतनिद्रांस्तंबेरमामुखरश्रंखलकर्षिणस्ते येषांविभातितरुणारुणरागयोगास्तिन्नाद्रिगैरिकतटाइवदंतकाशाः
७२ दीर्घेष्वमीनियमिताःपटमंडपेषुनिद्रांविहायवनजास्तवनायुदेश्याः वक्त्रोष्मणामलिनयंतिपुरोगतानिलत्वा
निसंधवशिलाशकलानिवाहः ७३ भवतिविरलभक्तिर्म्लानपुष्पोपहारःस्वकिरणपरिवेषोद्भेदशून्यःप्रदीपाः श्रय
मपिचगिरंनःस्वस्रबोधप्रयुक्तामनुवदतिशुकस्तेमंजुवाक्पंजरस्थः ७४ इतिविरचितवाग्भिर्बंदिपुत्रैःकुमारःसप
दिविगतनिद्रस्तल्पमुत्संचकार मदपटुनिनदद्भिर्बोधितोराजहंसैःसुरगजइवगांगंसकंतंसुप्रतीकः ७५ श्रथवि
धिमवसायशास्त्रस्त्रदृष्टंदिवसमुखोचितमंचितास्त्रिपद्मा कुशलविरचितानुरूपवेषःक्षितिपसमाजमगात्त्वयंवरस्थं
७६ इतिश्रीरघुवंशेमहाकाव्येकविश्रीकालिदासकृतोस्वयंवराभिगमनोनामपंचमः सर्गः ५ सतत्रमंचेषुम
नोभवेषान्सिहासनस्थानुपचारवत्सुः वैमानिकानामरुतामपश्यदाकृष्टलिलान्नरलोकपालान् १ रत्नैर्गृहीतानुनये
नकामंप्रत्यर्पितस्वांगमिवेश्वरेण काकुत्स्थमालोकयतांनृपाणांमनोबभूवेंदुमतीनिराशं २ वैदर्भनिर्दिष्टमथोकुमारः
ल्लक्षेनसोपानपथेनमंचे शिलाविभंगैर्मृगराजशावस्तुंगंनगोत्संगमिवारुरोह ३ पराध्यवर्णास्तरणोपपन्नमासेदि
वान्रत्नवदासनंसः भूयिष्ठमासीदुपमेयकांतिर्मपूरपृष्ठाश्रयिणागुहेनः ४ तासुश्रियाराजपरंपरासुप्रभाविशेषादयदु
र्निरीक्ष्ये महस्वधात्माव्यरुचद्विभक्तःपयोमुचांपंक्तिपुविद्युतेव ५ तेषामहार्हासनसंस्थितानामुदारनेपथ्यभृतांस
मध्ये राजाधिराजप्रवरंसमुद्रोरत्नाकरंपूर्वइवोपविष्टं ६ नेत्रव्रताःपौरजनस्यतस्मिन्विहायसर्वान्नृपतीन्निपे
तुः महात्करेरोचितपुष्परुक्षागंधद्विपेवन्यइवद्विरेफाः ७ श्रथस्तुतेबंदिभिरन्वयज्ञैःसोमार्कवंश्यनरदेवलोके स

303
1984

चारितेचागरुसारपोनोधूमेसमुत्सर्पतिवेजयंतीः ८ पुरोपकंठोपवनाश्रयाणांशिरखंडिनामुद्धतनृत्यहेतौ प्रधा
नशेषेपरितोदिगंतान्नूपेस्वनेमूर्छतिमंगलार्थे ९ मनुष्यवाह्यंचतुरस्रयानमध्यास्यकन्यापरिवारशोभि विवेश
मंचांतरराजमार्गंपतिविरालुप्तविवाहवेषा १० त्रिभिःकलापकं तस्मिन्विधानातिशयेविधातुःकन्यामयेनेत्रशते
कलक्ष्ये निपेदुरंतस्करणेनरेंद्रादेहस्थितानकेवलमासनेषु ११ तांप्रत्यभिव्यक्तमनोरथानांमहीपतीनांप्रणयाग्र
त्यः प्रवालशोभाइवपादपानांशृंगारचेष्टाविविधाबभूवुः १२ कश्चित्कराध्यामुपगूढनालमालोलपत्राभिहतद्विरे
फं रजोभिरंतःपरिवेषबंधिलीलारविंदंभ्रमयांचकार १३ विस्रस्तमंसार्पितबाहुपाशाविलासिरत्नानुवित्यांगदकोटिलग्नं
प्रावारमुत्क्षिप्ययथाप्रदेशंनिनायसाचाकृतचारुवक्त्रः १४ श्राकुंचिताग्रांगुलिनाततोन्यःकिंचित्समावर्जितनेत्र
शोभी तिर्यग्विसंसर्पिनखप्रभाणपादेनहंविलिलेखपीठं १५ निवेश्यवामंभुजमासनार्थेतत्संनिवेशादधिकोन्नतांसः
कश्चिद्विवृत्तत्रिकभिन्नहारःसुहृत्समाभाषणतत्परोभूत् १६ विलासिनीविभ्रमदंतपत्रमापांडुरंकेतकबर्हमन्यः
प्रियानितंबोचितसन्निवेशंविपादयामाससुवानखाग्रैः १७ कुशेशयाताम्रतलेनकश्चित्करेणरोधाध्वजलां
छनेन रत्नांगुलीयप्रभयानुविधानुदारयामाससलीलमास्यान् १८ कश्चिद्यथाभागमवस्थितेपित्यक्तासनेविस्मि
तलोधिनीव वज्रांशुभिन्नांगुलिरंधमेकंव्यापारयामासकरंकिरीटे १९ ततोनृपाणांश्रुतवृत्तवंशापुवत्सगज्जा
प्रतिहाररक्षी प्राकूसन्निकर्षंमगधेश्वरस्यनीत्वाकुमारीमवदत्सुनंदा २० श्रत्रांगराजेष्वधिपंप्रजानांसभाजयित्री
सत्वोमगधप्रतिष्ठः राजाप्रजारंजनलब्धवर्णःपरंतपोनामयथार्थनामाः २५ कामंनृपाःसंतिसहस्रशोन्येराज
न्वतीमाहुरनेनभूमीं नक्षत्रतारागृहसंकुलापिज्योतिष्मतीचंद्रमसैवरात्रिः २२ किंत्वाग्रबंधाद्ययमध्वराणामजस्रमा
हूतसहस्रनेत्रः शच्याश्चिरंपांडुकपोललंबान्मंदारशून्यानलकांश्चकार २३ श्रनेनचेदिच्छसियातुमाशुंपाणिं
वरेण्येनकुरुष्वयत्नं प्रासादवातायनसंस्थितानांनेत्रोत्सवंपुष्यपुरांगनानां २४ एवंनयोक्तंमवेक्ष्यकिंचिद्विश्रांत
दुर्वांकमधूकमालां रुजुप्रणामक्रिययेवतन्वीप्रत्यादिदेशानमभाषमाणा ३५ तांसववेत्रग्रहणेनियुक्तारांजां

तरंराजसुतांनिनाय समीरणोत्थेवतरंगलेखा पद्मांतरंमानसराजहंसी २६ जगादचैनामयमंगनाथःसुरांगनाप्रार्थि
तयौवनश्रीः विनीतनागः किलसूत्रकारैर्द्रुपदंभूमिगतोपिभुंक्ते २७ अनेनपर्यासयताश्रबिंदून्मुक्ताफलस्थूलत
मांस्तनेषु प्रत्यर्पितांशुर्विलासिनीनामासिंचतीगिरासूनृपातचर्यात्मेवकल्याणितयास्वतीया २९ तथागराजाद्
वतार्यचक्षुर्यतितिजन्यामदचत्कुमारी नासोनकाम्योनचवेदसम्यक्दृष्टेनसाभिलरुचिर्हिलोकः ३० ततःपरंदुःखे
प्रसहंपरेषांनृपंनियुक्ताप्रतिहारभूमौ निदर्शयामासविशेषदृश्यमिंदुर्नवोत्थानमिवंद्रुमत्यै ३१ अथेतिनाथोमयुद्
ग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः आरोप्यचक्रभ्रममुण्णतेजास्तस्थौवयत्नोल्लिखितोविभाति ३२ अस्यप्रयाणेषु
समग्रशक्तेरग्रेसरैर्वाजिभिरुध्यतानि कुर्वंतिसामंतशिखामणीनांप्रभाप्ररोहास्तमयंरजांसि ३३ असोमहाकालनि
केतनस्यवसन्नदूरेकिलचंद्रमौलेः तमिस्रपक्षेपिसहप्रियाभिर्ज्योत्स्नावतोनिर्विशतिप्रदोषान् ३४ अनेनयूनासहपा
र्थिवेनरंभोरुकश्चिन्मनसोरुचिर्नः शिप्रातरंगानिलकंपितासुविहर्तुमुद्यानपरंपरासु ३५ तस्मिन्नभिद्योतितबंधु
पद्मेप्रतापसंशोषितशत्रुपक्षे बबंधसानोन्नमसौकुमार्याकुमुद्वतीभानुमतीवभावं ३६ तामग्यतस्तामरसोत्तराभा
नृपाजस्यगुणैरनूनो विधायसृष्टिंललितांविधातुर्जगादभूयःसुदतीसुनंदा ३७ संग्रामनिर्विष्टसहस्रबाहुरष्टाद
शद्वीपनिषातयूपः अनन्यसाधारणराजशब्दोवाहयेयोगीकिलकार्त्तवीर्यः ३८ अकार्यचिंतासमकालमेवप्रादुर्भवंश्चापध
रःपुरस्तात् अतःशरीरैरपियःप्रजानांप्रात्पादिदेशाविनयंविनेता ३९ ज्याबंधनिस्यंदभुजेनपस्यविनिस्पृहंकपरं
परेण कारागृहेनिर्जितवासवेनलंकेश्वरेणोषितमाश्रमादात् ४० तस्यान्वयेभूपतिरेषजातःप्रतीपइत्यागमवृद्धसेवी
येनश्रियःसंश्रयदोषरूढंस्वभावलोलेत्ययशःप्रसृष्टं ४१ आयोधनेकृष्णगतिंसहायमवाप्ययःक्षत्रियकालरात्रिं धारा
शितारामपरश्वधस्यसंभावयत्पुत्पलपत्रसारां ४२ अस्यांकलक्ष्मीर्ननवदीर्घबाहोर्माहिष्मतीवप्रमितेव कांची प्रासादजाले
र्ऊर्ध्वलवेणिरम्यैरबांयदिप्रेक्षितुमालिकामः ४३ तस्याःप्रकामप्रियदर्शनोपिनसक्षितीशोचिरयेबभूव शरप्रसृष्टांबुधरोप
रोधः शरीषपर्याप्तकलोनलिख्याः ४४ सासूरसेनाधिपतिंसुषेणमुद्दिश्यदेशांतरगीतकीर्त्तिं आचारशुद्धोभयवंशदीपं शु
श्रावांतरस्थाजगदेकुमारी ४५ नीपान्वयःपार्थिवएषयज्वागुणैर्यमाश्रित्यपरस्परेण सिधाश्रमंशांतमिवेत्यसत्वैर्नमगिकां

305
1984

युक्तसृजेविरोधः ४६ यस्यात्मगेहेनयनाभिरामाकांतिर्हिमांशारिवसन्निविष्टा हर्म्याग्यसंरूढनृणांकुरेषुतेजोविसर्प्पि
षुमंदिरेषु ४७ यस्यावरोधस्तनचंदनानांप्रक्षालनाद्वारिविहारकाले कलिंदकन्यामथुरागतापिगंगोर्मिसंसक्तजलेवभाति
४८ अनेननतार्य्यात्किलकालियेनमणिंविसृष्टंयमुनोकसायः वक्षस्थलव्यापिरुचिंदधानःसकौस्तुभेनेद्वपयतीवविष्णुं ४९
संभाव्यभर्त्तारमसंयुवानंमृदुप्रवालोत्तरपुष्पशय्ये वृंदावनेचैत्ररथादनूनेनिर्विश्यतांसुंदरियौवनश्रीः ५० अध्यास्यचाभः पृ
षतोक्षितानिशैलेयनद्धानिशिलातलानि कलापिनांप्रावृषिपश्यनृत्यंकांतासुगोवर्धनकंदरासु ५१ नृपंतमावर्त्तमनोज्ञना
भिःसाध्वत्यगादन्यवधूर्भवित्री महीधरंमार्गवशादुपेतंश्रोतोवहासागरगामिनीव अथांगदाश्लिष्टभुजंभुजिष्योहमांगदेना
मकलिंगनाथं आसेदुषीसादितशत्रुपक्षंबालामबालेंदुमुखीबभाषे ५३ असौमहेंद्राद्रिसमानसारःपतिर्महेंद्रस्यमहोद
धेश्च यस्यसरसेन्यगजच्छलेनयात्रासुयातीवपुरोमहेंद्रः ५४ ज्याघातलेखेसुभुजोभुजाभ्यांबिभर्त्तियश्चापभृतांपुरोगः
रिपुःश्रियःसाध्वनवाप्यसेकेबंदीकृतायाइवपद्धतीर्हे ५५ यमात्मनःसद्मनिसन्निविष्टंमंद्ध्वनित्याजितयामतूर्यः त्रासाद
वातायनदृश्यविधिःप्रबोधयन्नर्णवएवसुप्तां ५६ अनेनसार्द्धविहरांबुरासेस्तीरेषुतालीवनमर्मरेषु द्वीपांतरानिंतलवंगपुष्प
रपाकृतस्वेदलवामरुद्भिः ५७ प्रलोभिताप्याकृतिलोभनीयाविदर्भराजावरजानयेवं तस्मादपावर्त्ततदूरकृष्टनीत्येवल
क्ष्मीःप्रतिकूलदेवान् ५८ अथोरुगाख्यस्यपुरस्यनाथंदौवारिकीदेवसमानमेत्य इतश्चकारोक्षिविलोकयेतिपूर्वानुशिष्टां
निजगादभोज्यां ५९ पाद्योयमर्घ्यापितलंबिहारःलक्ष्मांगरागोहरिचंदनेन आत्मातिबालातपरक्तकानुःसंनिकर्षेसन्दार
द्वाद्विराजः ६० विंध्यस्यसंस्तंभयितामहाद्रेर्निःशेषपीतोज्झितसिंधुराजः प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः सात्मातिकोय
स्यभवत्यगस्त्यः ६१ अस्त्रंहरादाप्तवतादुरापंयेनेंद्रलोकावजपायदक्षः पुराजनस्थानविमर्द्दशंकीसंधायुलंकाधिपतिः
प्रतस्थे ६२ अनेनपाणौविधिवद्गृहीतेमहाकुलीनेनमहीयसीर्वी रत्नानुविद्धार्णवमेखलायादिशःसपत्नीभवदक्षिणस्याः
६३ तांबूलवल्लीपरिणद्धपूगनारंगलोलतालिंगितचंदनासु तमालपत्रास्तरणासुरंतुप्रसीदशाल्वंतमलपस्थलीषु ६४ इंदी
वरश्यामतनूनृपोसौत्वरोचनागौरशरीरयष्टिः अन्योन्यशोभापरिवृद्धयेवांयोगस्तडित्तोयदयोरिवास्तु ६५ स्वसुर्विदर्भा

धिपतेस्तदीयोलेभेंतरंचेनभिनोपदेशः दिवाकरादर्शनबन्धकोशेमनक्षत्रनाथांशुरिवारविंदे ६६ संचारिणीदीपशिखेववा
त्रौयंयेव्यतीयावयपतिंवगसा नरेंद्रमार्गाट्ट इवप्रपेदेविवर्णभावंसस्मभूमिपालः ६७ तस्योरघोःसूनुरुपस्थितायांवृणीत
मानेमितिसमाकुलोऽभूत् वामेतरःसंशयमस्यबाहुःकेयूरबंधोच्छ्वसितैर्ननोद ६८ तंप्राप्यसर्वावयवानवद्यंव्यावर्त्ततान्यो
पगमात्कुमारी नहिप्रफुल्लंसहकारमल्पेतरसातरकांक्षतिषट्पदालिः तस्मिंश्चभावेशितचित्रवर्त्तिमिंदुप्रभामिंदुमती
मवेक्ष्य प्रचक्रमेवक्तुमनुक्रमज्ञासुविस्तरंवाक्यमिदंसुनंदा ७० महेंद्रमास्थायमहोक्षरूपंयःसंयतिग्रामपिनाकिलीलः
चकारबाणैरसुरोगनानांगलुंठयालीःप्रोषितपत्रलेखाः ७१ इक्ष्वाकुवंशप्रकुदंवृपाणांकुकुत्स्थइत्याहितलक्षणोभू
त् ककुत्स्थशब्देयतउन्नतेच्छाश्लाघ्यांदधत्युत्तरकोशलेंद्राः ७२ ऐरावतास्फालनविश्लथंयःसंघट्टयन्नेगरमंगदेन
उपेयुषःस्वामपिमूर्त्तिमत्त्यामर्घासतंगोत्रभिदाधिनस्थौ ७३ जातःकुलेतस्यकिलोरुकीर्त्तेःकुलप्रदीपोनृपतिर्दिलीपः
श्रुतिप्रदेवोनशतक्रतुत्वेशक्राश्रयसूयाविनिवृत्तयेयः ७४ यस्मिन्महीशासतिवाणिनीनांनिद्रांविहाराधिपयेगतानां
वातोपिनासंश्रयदंशुकानिलंभयेदाभरणायहस्तं ७५ पुरारघुस्तस्यपदंप्रशास्तिमहाक्रतोर्विश्वजितःप्रयोक्ता चतुर्दि
गावर्जितसंभृतायामृत्सान्त्रशेषामकरोद्विभूतिं ७६ आरूढमदोद्धतनागयोधान्प्रतीर्णभुजंगमानावसतिंप्रविष्टं ऊर्ध्वंगतंय
स्यनचानुबंधियशःपरिच्छेत्तुमियत्तयालं ७७ असौकुमारस्तमनोनुजातस्त्रिविष्टपस्यपतिंजयंतः गुर्वीधुरंयोभुवन
स्यपित्राधुर्येणदृढव्रतस्यःसदृशीबिभर्त्ति ७८ कुलेनकांत्यावयसानवेनगुणैश्चतैर्विनियप्रधानैः त्वमात्मनस्तुल्यममुं
गुणैर्घरत्नंसमागच्छतुकांचनेन ७९ ततःसुनंदावचनावसानेलःज्ञातनूकृत्यनरेंद्रकन्या दृष्ट्वाप्रसादामलयाकुमारंप्र
त्यग्रहीत्संवरणसृजेव ८० सायूनितास्मिन्नभिलाषबंधंशशाकशालीननतयावनक्रं रोमांचभेदेनसगात्रयष्टिंभित्वानि
राक्रामदरालकेश्याः ८१ तथागतायांपरिहासपूर्वंसख्यांसखीवित्रधराबभाषे आर्यव्रजामोन्यतइत्यथैनांवधूरसूया
कुटलंददर्श ८२ सान्पूर्णगौरंरघुनंदनस्यधात्रीकराभ्यांकृतशोपमोरूः आसंजयामासयथाप्रदेशंकंठेगुणंमूर्त्तमिवानु
रागं ८३ तयास्रजामंगलपुष्यमय्याविशालवक्षस्थलंबयासः अमंस्तकंठार्पितबाहुपाशोविदर्भराजावरजांवरेण्यः

307
1984

शशिनमुपगतेयंकौमुदीमेघमुक्तंजलनिधिमनुरूपंजह्नुकन्यावतीर्णा इतिसमगुणयोगप्रीतयस्तत्रपौराःश्रवणक
टुनृपाणामेकवाक्यंविवव्रुः ८५ अमुदितवरपक्षमेकतस्तत्क्षितिपतिमंडलमन्यतोविनानं उषसिसइवप्रफुल्लपद्मंकु
मुदवनप्रतिपन्ननिद्रमासीत् ८६ इतिश्रीरघुवंशमहाकाव्येकविश्रीकालिदासकृतौस्वयंवरवर्णनोनामषष्टःसर्गः ६

अथोपयंत्रासदृशोनयुक्तांस्कंदेनसाक्षादिवदेवसेनां स्वसारमादायविदर्भराजः पुरप्रवेशाभिमुखोबभूव १
सेनानिवेशान्पथिवीभृतोपिजुगुप्सुविभ्रान्तगृहंरभासः भोज्यांप्रतिव्यर्थमनोरथत्वाद्वेषुवेशेषुचसाध्यसूयाः २ सा
न्निध्ययोगात्किलतत्रशब्याःस्वयंवरक्षोभकृताप्रभावः काकुस्थमुद्दिश्यसमत्सरोपिशशामतेनक्षितिपाललोकः ३ ना
वत्सकीर्णाभिवनेपचारमिंद्रायुधद्योतिततोरणांकं वरःसघण्टासहराजमार्गंप्रापध्वजच्छायनिवारितोष्णं ४ ततस्तदा
लोकनतत्पराणांसौधेषुचामीकरजालवत्सु बभूवुरित्थंपुरसुंदरीणांत्यक्तान्यकार्याणिविचेष्टितानि ५ आलोकमार्गंसह
सात्रयाकयाचिद्दुहृष्टनवांतमाल्यः बहुनसंभावितएवतावत्करेणरुध्योपिहिकेशपाशः ६ प्रसाधिकालंबितमग्रपादम
क्षिप्यकाचिद्वरयागमेव उत्सृष्टलीलागतिरागवक्षादलक्तकांकापदवीततान ७ विलोचनंदक्षिणमंजनेनसंभाव्यतद्वं
चितवामनेत्रा तथैववातायनसन्निकर्षंययौशलाकामपरावहंती ८ जालांतरप्रेषितदृष्टिरन्याप्रस्थानभिन्नानवबंध
नीवी नाभिप्रविष्टाभरणप्रभेणहस्तेनतस्थाववलंब्यवासः ९ अर्धाचितामत्वरमुत्थितायाःपदेपदेदुर्निमितंगलंति क
स्याश्चिदासीद्रसनातदानींमणिप्रभालंबितसूत्रशेषा १० तासांमुखैरासवगंधगर्भैर्व्याप्तांतराःसांद्रकुतूहलानां विलो
लनेत्रभ्रमरैर्गवाक्षाःसहस्रपत्राभरणाइवासन् ११ ताराधवंदृष्टिभिरापिबंत्यानार्योनिजग्मुर्विषयांतराणि तथाहिशै
ब्येद्रियवृत्तिरासांसर्वात्मनाचक्षुरिवप्रविष्टा १२ स्थानेनृताभूपतिभिःपरोक्षैःस्वयंवरंसाधुममंस्तभोज्या पद्मेवनाग
यणमन्यथासौलभेतकांतंकथमात्मतुल्यं १३ परस्परेणस्पृहणीयशोभंचेदिदंदूढमयोजयिष्यन् अस्मिन्द्वयरूप
विधानयत्नः पत्युःप्रजानांवितथोभविष्यत् १४ रतिस्मरोनूनमिमावभूतांराज्ञासहस्रेषुतथाहिबाला गतेयमात्मप्र
तिरूपमेवामनोहिजन्मांतरसंगतिज्ञं १५ इत्युद्गताःपौरवधूमुखेभ्यःशृण्वन्कथाःश्रोत्रसुखाःकुमारः उदासितमे

गलसंविधानैः संबंधिनः सद्म समाससादः २६ तत्रावतीर्याश्रुकरेणुकायाः सकामरूपेश्वरदत्तहस्तः वैदर्भनिर्दिष्ट
र्थैर्विवेशानारीसनांसीवचतुष्कमंतः २७ तत्रार्चितोभोजपतेः पुरोधाहुत्वाग्निमाज्यादिभिरग्निकल्पः तमेवचाधार्यवि
वाहलक्ष्मीवधूवरंसंगमयांचकार २८ महार्हसिंहासनसंस्थितासौसरत्नमध्यंमधुमद्घटाग्र्यं भोजोपनीतंचदुकूलयुग्मं
जग्राहसार्धंवनिताकटाक्षैः २९ दुकूलवासाःसवधूसमीपंनिन्येविनीतैरवरोधरक्षैः वेलासकाशंस्फुटफेनराजिर्नव
रुद्भानिवचंद्रपादैः ३० क्षेपक हस्तेनहस्तंपरिगृह्यबंधोःसराजसूनुःसुतरांबभासे अनंतराशोकलताप्रवालं प्राप्ये
वनूतनःप्रतिपल्लवेन ३१ आसीद्दूरःकंठकिनप्रकोष्ठःस्विन्नांगुलिःसेवनतेकुमारी तस्मिन्न्ययतत्क्षणमात्मवृत्तिःसमं
विभक्तेवमनोभवेन ३२ तयोरुपांतप्रतिसारितानिक्रियासमापक्तिपुकांतराणि हीयंत्रणामानशिरोमनोज्ञामन्योन्य
लोलानिविलोचनानि ३३ प्रदक्षिणप्रक्रमणात्तत्रानोरुदर्चिषस्तान्यिथुनंचकासे मेरोरुपांतेष्विववर्त्तमानमान्यान्य
संसक्तमहर्गल्रियामं ३४ नितंबगुर्वीगुरुणाप्रयुक्तावधूर्विधानृपप्रतिमेनतेन चकारसामन्त्रचकारनेत्रालज्जावती
लाजविसर्गमग्नौ ३५ हविःशमीपल्लवलाजगंधीपुण्यःकृशानोरुदियायधूमः कपोलसंसर्पिशिखःसतस्यामुहूर्त्तकं
लेत्यिलतीप्रपेदे ३६ तदंजनक्लेदसमाकुलाक्षंम्लानबीजांकुरकर्णपूरं मधूमुखंपाटलगंडलेखमाचारधूमग्रहणा
दभूच ३७ तौस्नातकैर्बंधुमताचराज्ञापुरंध्रिभिश्चक्रमशःप्रयुक्ते कन्याकुमारीकनकासनस्थावार्द्राक्षतारोपणमंत्र
भूतं ३८ इतिस्वसुर्भोजकुलप्रदीपःसंपाद्यपाणिग्रहणंसराजा महीपतीनांपृथगर्हणार्थंसमादिदेशाधिकजानधिश्रीः
३९ लिंगैर्मुदःसंवृतविक्रियास्तत्तदाप्रसन्नाइवगूढनक्राः वैदर्भमामंत्र्ययुर्ययुस्तदीयांप्रत्यर्प्यपूजामुपदाछलेन ४०
सराजलोकःकृतपूर्वसंविदारंभसिधोसमेरणलभ्यं आदास्यमानाःप्रमदामिषंतदाहृत्ययथानमज्जस्यतस्थौ ४१ भर्त्रा
पितावत्पृथकेशकानामनुष्ठितानंतरजाविवाहः शक्त्यानुरूपाभरणीकृतश्रीःप्रस्थापयद्राघवमन्वगाच्च ४२ तिस्रः
